# नीतिशास्त्रम्

**कक्षा ७**




नेपालसर्वकारः

शिक्षाविज्ञानप्रविधिमन्त्रालयः

पाठ्यक्रमविकासकेन्द्रम्

सानोठिमी–भक्तपुरम्

# नीतिशास्त्रम्

कक्षा ७

नेपालसर्वकारः
शिक्षाविज्ञानप्रविधिमन्त्रालयः
पाठ्यक्रमविकासकेन्द्रम्
सानोठिमी–भक्तपुरम्

प्रकाशकः

**नेपालसर्वकारः**

**शिक्षाविज्ञानप्रविधिमन्त्रालयः**

**पाठ्यक्रमविकासकेन्द्रम्**

**सानोठिमी–भक्तपुरम्**

प्रस्तुतपाठ्यपुस्तकसम्बन्धिनः सर्वेऽधिकाराः पाठ्यक्रमविकासकेन्द्रस्य स्वामित्वेऽन्तर्निहितास्सन्ति। लिखितां स्वीकृतिं विनाऽस्य पुस्तकस्य पूर्णभागस्य एकांशस्य वा यथावत् प्रकाशनम्, परिवर्त्य प्रकाशनं तथा केनाऽपि वैद्युतेन साधनेन अन्येन प्रविधिना वा यन्त्रप्रयोगेण प्रतिलिपिनिस्सारणञ्च सर्वथा निषिद्धं वर्तते ।

सर्वेऽधिकाराः प्रकाशकाधीनाः

प्रथमसंस्करणम् - २०८०

# अस्मदीयं कथनम्

विद्यालयस्तरीयशिक्षामुद्देश्यप्रधानां व्यावहारिकीं सामयिकीं वृत्तिदायिनीं च विधातुं समये समये पाठ्यक्रम-पाठ्यपुस्तकविकास-परिमार्जनानुकूलनकार्याणि निरन्तरं सञ्चाल्यमानानि सन्ति। विद्यार्थिषु राष्ट्रराष्ट्रियते प्रति सम्मानभावनामुद्भाव्य नैतिकानुशासन-स्वावलम्बनादि-सामाजिक-चारित्रिक-गुणानामाधारभूत-भाषिकशिल्पस्य विकासपूर्वकं सहयोगात्मकस्य दायित्वपूर्णस्य चाऽऽचरणस्य विकासोऽद्यत्वे आवश्यको दृश्यते। अस्या एवावश्यकतायाः परिपूर्तये शिक्षासम्बद्धैर्महानुभावैः सम्मिलितानां गोष्ठीनामन्तःक्रियायाश्च निष्कर्षेण निर्मितं २०७८ तमस्य वैक्रमाब्दस्य पाठ्यक्रममनुसृत्य पुस्तकमिदं निर्मितं वर्तते। शिक्षा विद्यार्थिषु वर्तमानस्य ज्ञानपक्षस्यान्वेषणं विधाय शिक्षणशिल्पेन जीवनस्य सम्बन्धं स्थापयति। शिक्षया विद्यार्थिषु स्वाधिकारस्य, स्वतन्त्रतायाः, समानतायाश्च प्रवर्धनाय, स्वस्थजीवनस्याभ्यासाय, तार्किकविश्लेषणेन निर्णयाय, वैज्ञानिकविश्लेषणेन व्यक्ति-समाज-राष्ट्राणां सबलविकासाय चाग्रेसरणशीलं सामर्थ्यं विकसनीयम्। एवं व्यक्तेः नैतिकाचरणप्रदर्शनाय, सामाजिकसद्भावप्रवर्धनाय, पर्यावरणस्य समुचितप्रयोगशिक्षणाय, दृढशान्तौ प्रतिबद्धतायै च शिक्षायाः आवश्यकता समाजे अवलोक्यते। तेन समाजसापेक्षतया ज्ञान-शिल्प-सूचना-सञ्चार-प्रविधीनां प्रयोगसमर्थाः, स्वावलम्बिनः, व्यावसायिकशिल्पाभ्यासनिरताः, राष्ट्रं राष्ट्रियतां राष्ट्रियादर्शं च प्रति सम्मानविधायकाः, समाज-स्वीकार्याः, सदाचरणशीलाः, स्वसंस्कृति-संस्कारपालनपराः, परसंस्कृत्यादिषु सहिष्णवश्च नागरिकाः शिक्षया निर्मातव्याः। एवं कल्पनाशीलानां रचनाशिल्पिनाम्, नैरन्तरिकपरिश्रमेणोद्यमशीलानाम्, विचारे उदात्तानाम्, व्यवहारे आदर्शमयानाम्, सामयिकसमस्यानां व्यवस्थापने साफल्याधायकानाम्, स्वावलम्बिनाम्, देशभक्तानाम्, परिवर्तनोद्यतानाम्, चिन्तनशीलानाम्, समावेशिसमाजनिर्माणे योगदानं करिष्यमाणानां च नागरिकाणां निर्माणं शिक्षया विधातव्यमिति समाजस्यापेक्षा दृश्यते। इमानेव पक्षान् विचार्य 'राष्ट्रिय-पाठ्यक्रम-प्रारूप, २०७६' इत्यनुसारेण निर्मितस्य नीतिशास्त्रविषयकपाठ्यक्रमस्याधारेण सप्तम्याः कक्षायाः पाठ्यपुस्तकमिदं विकसितं वर्तते।

इदं पुस्तकं पर्वतराजः घिमिरे, गणेशः तिमिल्सिना, केशवः भट्टराई, पुरुषोत्तमः घिमिरे-प्रभृतीनां महानुभावानां कार्यदलेन परिमार्जितं सम्पादितञ्चास्ति। अस्य पाठ्यपुस्तकस्य विकासे पाठ्यक्रमसिद्धान्तसंरचनयोः नवीनतमधारणामनुसृत्य परम्परागतानां शिल्पानामनुसरणं

कृतमस्ति । अस्मिन् कार्ये अस्य केन्द्रस्य महानिर्देशकः अणप्रसादः न्यौपाने, प्रा.डा. नुरापतिः पोखरेल, सहप्रा. ध्रुवप्रसादः भट्टराई, उपप्रा. रोहिणीराजः तिमिल्सिना, निश्चलः अधिकारी, शिवराजः लामिछाने, टुकराजः अधिकारी-प्रभृतीनां महानुभावानां विशेषसहयोगो विद्यते । अस्य टङ्कणं रूपसज्जा चेत्यादिकं खडोस सुनुवार इत्याख्येन महानुभावेन कृतमस्ति ।

पाठ्यपुस्तकं शिक्षणप्रक्रियाया महत्त्वपूर्णसाधनं भवतीति नाविदितं शेमुषीमताम् । सानुभवाः शिक्षकाः, जिज्ञासवश्छात्राः, सविधिकर्मकराश्च पाठ्यक्रमलक्ष्यीकृतान् विषयान् नैकविधस्रोतसां साधनानाञ्चोपभोगेन अध्यापयितुमध्येतुं कर्म कर्तुं च प्रभवन्ति । अनेकैः कारणैः सर्वेष्वेव विद्यालयेषु सरलतया पाठ्योपकरणानामुपलब्धेरभावाद् अध्ययनकार्यं केवलं पाठ्यपुस्तकाश्रितं भवतीति तथ्यमात्मसात्कृत्य प्रस्तुतमिदं पाठ्यपुस्तकं यथासम्भवं स्तरयुतं विधातुं प्रयासो विहितः, तथापि पाठ्यपुस्तकेऽस्मिन् यत्र यत्र त्रुटयोऽल्पताश्च विदुषां दृष्टिपथमागच्छेयुस्तत्र तत्र परिष्कारे परिवर्धने च दृग्गोचरीभूतानां त्रुटीनां परिमार्जनादिकार्यजाताय परामर्शप्रदानविधौ शिक्षकच्छात्राभिभावकपाठकविशेषज्ञानां महती प्रभावकारिणी भूमिका भवति । अत उक्तविषयेषु रचनात्मकपरामर्शदानेनोपकर्तुं पाठ्यक्रमविकासकेन्द्रमिदं तांस्तान् सर्वानेव महानुभावान् सप्रश्रयमभ्यर्थयते ।

नेपालसर्वकारः

**शिक्षाविज्ञानप्रविधिमन्त्रालयः**

पाठ्यक्रमविकासकेन्द्रम्

# विषयसूची


| पाठसङ्ख्या | पाठः | पृष्ठसङ्ख्या |
| --- | --- | --- |
| वन्दना | | १ |
| प्रथमः | श्रमिकस्य आनन्दानुभूतिः | २ |
| द्वितीयः | त्याग एको गुणः श्लाघ्यः | ९ |
| तृतीयः | मित्राणां पारस्परिकं साहाय्यम् | १६ |
| चतुर्थः | सर्वदेवमयोऽतिथिः | २३ |
| पञ्चमः | स्वसंस्कृतेः संरक्षणम् | ३१ |
| षष्ठः | नारीसम्मानम् | ३८ |
| सप्तमः | दानमहिमा | ४४ |
| अष्टमः | मधुरभाषणम् | ५२ |
| नवमः | गोमायुदुन्दुभिकथा | ६१ |
| दशमः | प्राप्तव्यमर्थं लभते मनुष्यः | ६६ |
| एकादशः | गुरुसेवा | ७१ |
| द्वादशः | महर्षिः याज्ञवल्क्यः | ७८ |
| त्रयोदशः | सद्भिः कुर्वीत सङ्गतिम् | ८७ |
| चतुर्दशः | नापितस्य कथा | ९४ |
| पञ्चदशः | उद्यममहत्त्वम् | १०२ |
| षोडशः | सन्मार्गः | १०९ |
| सप्तदशः | सन्तोषसुखम् | ११७ |
| अष्टादशः | लुप्तमहादेवः | १२५ |
| एकोनविंशः | आपणाटनम् | १३२ |

# वन्दना



अनुव्रतः पितुः पुत्रो मात्रो भवतु संमनाः ।
जाया पत्ये मधुमतीं वाचं वदतु शन्तिदाम् ॥
मा भ्राता भ्रातरं द्विक्षन्मा स्वसारमुत स्वसा ।
सम्यञ्च सव्रता भूत्वा वाचं वदत भद्रया ॥
नन्दन्तु सर्वभूतानि स्निह्यन्तु विजनेष्वपि ।
स्वस्त्यस्तु सर्वभूतेषु निरातङ्कानि सन्तु च ॥
मा व्याधिस्तु भूतानामाधयो न भवन्तु च ।
मैत्रीमशेषभूतानि पुष्यन्तु सकले जने ॥

प्रथमः पाठः

# श्रमिकस्य आनन्दानुभूतिः

रामकृष्णः परमहंसो महाकाल्या महान् उपासक आसीत्। यत्र आश्रमे स निवसति स्म, तत्रैव निकटे कालीमन्दिरं निर्मीयमाणम् आसीत्। तत्र बहवः श्रमिकाः कार्यं कुर्वन्त आसन्। तेषु केचन प्रस्तरान् त्रोटयन्त आसन्, केचन प्रस्तरखण्डान् ऊढ्वा मन्दिरस्य पीठिकानिर्माणस्थले प्रापयन्त आसन्, केचन प्रस्तरैः प्राकारं रचयन्त आसन्। केचन कपाट-गवाक्षादिरचनायै काष्ठखण्डान् आनयन्त आसन्, केचन च बालुकां चालयन्त आसन्। एवं सर्वेऽपि स्वेषु कार्येषु निरता दृश्यन्ते स्म।

स्वामी रामकृष्णः परमहंसस्तत्र भ्रामं भ्रामं निर्माणकार्यं निरीक्षते स्म। एकदा स निर्माणक्षेत्रे पर्यटन् आसीत्। प्रस्तरान् खण्डयतः श्रमिकान् प्रति तस्य मनसि एका जिज्ञासा समुद्भूता। 'क्रियमाणं श्रमं प्रति श्रमिकाणां कीदृशी भावना भवेत् ?' इति जिज्ञासां शमयितुं पिपृच्छिषा





अजायत । स प्रस्तरान् खण्डयन्तं पुरोवर्तिनम् एकं श्रमिकम् अपृच्छत्, "भ्रातः ! कथम् अनुभूयते एतत् कार्यम् ?" श्रमिक ईषद् रोषेण प्रत्युदतरत्, "प्रस्तरखण्डनकार्यं प्राप्तम् अस्ति, तदेव करोमि । एतादृशस्य दुष्करस्य कार्यस्य अनुभवोऽपि पृच्छाया विषयः किम् ?" श्रमिकस्य उत्तरमिदं पुनः अपरं श्रमिकं अमुमेव प्रश्नं प्रष्टुं प्रेरणाम् अयच्छत् । स किञ्चिद् अग्रे गत्वा अपरं श्रमिकम् अपृच्छत्, "भवान् मन्दिरनिर्माणस्य कार्यं कुर्वन् अस्ति । अस्मिन् कार्ये कीदृशी अनुभूतिः भवतः ?" "स्वामिवर्य ! अत्र भवतः प्रश्न एव अनुचितः । यतो हि, आजीविकायै कार्यं करणीयम् एव अस्ति चेद् एतद् अशोभनं शोभनं कष्टावहं सुखावहं वा इति चिन्तनम् एव व्यर्थम् । स्वस्य आजीविकायै एतत् करणीयम् अस्ति, तदेव कुर्वन् अस्मि ।" एतद् निशम्य सः अग्रे प्रस्थितः ।

रामकृष्णः किञ्चिद् दूरं प्राप्य एकम् अपरं च श्रमिकं तमेव पूर्वतनं प्रश्नम् अपृच्छत् परन्तु प्रस्तरखण्डने ध्यानमग्नः स रामकृष्णस्य तत्र आगमनम् एव न अजानात् । प्रस्तरान् खण्डयन् स एकतानेन कालीभजनं च गायन् आसीत् । श्रमिकः स्वकार्ये लीनतया तत्र स्वस्य उपस्थितिम् एव न ज्ञातवान् इति मत्वा रामकृष्णः तस्य ततोऽपि अधिकतरं निकटं प्राप्नोत् । रामकृष्णस्य अतिसमीपे उपगते हि श्रमिकस्य कार्यलीनता विच्छिन्ना जाता । श्रमिको भजनगायनं विरम्य सहसा उदतिष्ठत् । रामकृष्णः प्रश्नं पुनः आवर्तयत् । श्रमिक उदतरत्, "स्वामिमहाराज ! उदरभरणाय कार्यं तु किमपि कर्तुं शक्यते परन्तु यत्र सम्यक् चेतःप्रसादनं भवति, तद् दिव्यं

कर्म । इह मातुः काल्या मन्दिरस्य निर्माणस्थले कार्यकरणं नहि सामान्यं कर्म । अतः अहं तु एतद् विचार्य प्रसीदामि यत्, मातुः गृहं रचयन् अस्मि" इति ।

तृतीयस्य श्रमिकस्य उत्तरे काचन विशेषता आसीत् । तस्य उत्तरेण सन्तुष्टः रामकृष्ण आश्रमं प्रत्यागच्छत् । प्रश्न एक एव परन्तु उत्तरेषु प्रतिश्रमिकं महद् अन्तरम् आसीत् । 'मानवो यत्किमपि करोति, तत्र आनन्दानुभूतिः कष्टानुभूतिः सामान्यानुभूतिर्वा' इति तदीयं चिन्तनं खलु निश्चिनोति । सुनिश्चितं वर्तते यत्, अस्मदीयं चिन्तनम् एव प्रायः अस्मान् आनन्दयति पीडयति च । अतो जीवने सदैव आनन्दानुभूत्यै अस्माभिः नित्यं सुचिन्तनं करणीयम् ।

## शिक्षणालोकः

**सदैव शोभने कर्मणि प्रवर्तनाय छात्राः प्रेरणीयाः । एवञ्च महापुरुषाणां प्रसङ्गान् श्रावयित्वा सदा सुचिन्तनेन प्रसन्नेन चेतसा च स्वकर्म करणीयम् इति च ते बोधनीयाः ।**

## अभ्यासः

### पाठानुशीलनम्

१. **पाठस्य सस्वरवाचनं कुरुत ।**

२. **शुद्धम् उच्चारयत**

समीपस्थे, पीठिकानिर्माणस्थले, काष्ठखण्डान्, निरीक्षते स्म, पुरोवर्तिनम्, प्रस्तरखण्डनकार्यम्, पृच्छायाः, आजीविकायै, सम्बोध्य, कार्यलीनता, भजनगायनम्, निश्चिनोति, सुनिश्चितम्, अस्मदीयम्, करणीयम् ।

३. **पाठाधारेण संशोध्य लिखत**

(क) रामकृष्णस्य आश्रमस्य निकटे शिवमन्दिरं निर्मीयमाणम् आसीत् ।

(ख) सः चतुरः श्रमिकान् प्रश्नम् अपृच्छत् ।

(ग) श्रमिकः महता रोषेण प्रत्युदतरत् ।

(घ) श्रमिकं संबोध्य सः पुनः नवीनं प्रश्नम् अपृच्छत् ।

(ङ) केचन कपाटगवाक्षादिरचनायै ताम्रखण्डान् आनयन्तः आसन् ।

(च) प्रश्नः एकः एव आसीत् ।

(छ) द्वितीयः श्रमिकः भजनं गायन् आसीत् ।

४. **पाठस्य सारांशं वदत ।**

५. **पदावलीः परस्परं मेलयत**

| **'अ' समूहः** | **'आ' समूहः** |
|---|---|
| केचन प्रस्तरान् | चालयन्तः आसन् । |
| केचन बालुकां | आगमनम् एव न अजानात् । |
| तत् निशम्य सः | त्रोटयन्तः आसन् । |
| सः रामकृष्णस्य तत्र | किमपि कर्तुं शक्यते । |
| उदरभरणाय कार्यं तु | ततः अग्रे प्रस्थितः । |
| अहं मातुः गृहं | प्राय आनन्दयति पीडयति च । |
| अस्मदीयं चिन्तनमेव | रचयन् अस्मि । |

६. **पाठाधारेण रिक्तस्थानं पूरयत**

(क) तत्र ......... श्रमिकाः कार्यं कुर्वन्तः आसन् ।

(ख) एकदा सः ......... पर्यटन् आसीत् ।

(ग) सः किञ्चिद् अग्रे ......... अपरं श्रमिकम् अपृच्छत् ।

(घ) स्वस्य आजीविकायै एतत् ......... अस्ति ।

(ङ) उत्तरेषु ........... महद् अन्तरम् आसीत् ।

(च) आनन्दानुभूत्यै नित्यं ......... करणीयम् ।

७. **पदानि प्रयुज्य वाक्यानि रचयत**

कुर्वन्तः, रचयन्तः, जिज्ञासा, श्रमिकः, अशोभनम्, सुखावहम्, निशम्य, प्रश्नः, प्राकारः, उदरभरणाय, सन्तुष्टः, चिन्तनम्, आनन्दानुभूतिः, नित्यम् ।

८. **सङ्क्षेपेण उत्तरयत**

(क) रामकृष्णः भ्रामं भ्रामं किं निरीक्षते स्म ?

(ख) केचन प्रस्तरैः किं रचयन्त आसन् ?

(ग) कस्य श्रमिकस्य उत्तरे विशेषता आसीत् ?

(घ) कस्य कार्यलीनता विच्छिन्ना जाता ?

(ङ) रामकृष्णः कुत्र निवसति स्म ?

(च) अस्मान् किम् आनन्दयति ?

(छ) प्रतिश्रमिकम् उत्तरेषु किम् आसीत् ?

(ज) जीवने आनन्दानुभूत्यै किं करणीयम् ?

**९. पर्यायं निश्चित्य लिखत**

| | | | | |
|---|---|---|---|---|
| (क) | कार्यम् | = | ................ | (कर्म, करः, कटाहः) |
| (ख) | पर्यटन् | = | ................ | (गच्छन्, खादन्, भ्रमन्) |
| (ग) | प्रस्तरः | = | ................ | (पवनः, पाषाणः, पावकः) |
| (घ) | अनुभूतिः | = | ................ | (अनुभवः, अनुचरः, अनुसरः) |
| (ङ) | व्यर्थम् | = | ................ | (वाणी, वृथा, वृकः) |
| (च) | चेतः | = | ................ | (चित्तम्, चयनम्, चायम्) |
| (छ) | प्राप्तिः | = | ................ | (विमतिः, सम्मतिः, अवाप्तिः) |
| (ज) | सामान्यम् | = | ................ | (सामयिकम्, साधारणम्, सार्थकम्) |

**१०. गद्यांशं पठित्वा प्रश्नान् उत्तरयत**

'नीयन्ते प्राप्यन्ते लभ्यन्ते अवगम्यन्ते धर्मार्थकाममोक्षोपाया अनया अस्यां वा' इति नीतिः । प्रापणार्थकाद् णीञ्-धातोः करणे अधिकरणे च क्तिन्प्रत्यये विहिते सति नीतिपदं निष्पद्यते । अर्थ-कामविषयिणी नीतिः राजनीतिः अस्ति चेद् धर्म-मोक्षविषयिणी नीतिः धर्मनीतिः । एवं नीतिः चतुर्विधानां पुरुषार्थानां प्रापिका वर्तते । भगवता श्रीकृष्णचन्द्रेण च स्वस्य विभूतिवर्णनसन्दर्भे उक्तमस्ति- "नीतिरस्मि जिगीषताम्" इति ।

वैदिकसाहित्ये लौकिकसाहित्ये च नीतिशास्त्रस्य विशालं भाण्डागारं वर्तते । तत्र ऋगादिवेदेषु, ईशावास्याद्युपनिषत्सु, मन्वादिस्मृतिषु, रामायण-महाभारतादीतिहासग्रन्थेषु, मार्कण्डेयादिपुराणेषु च प्रभूतानि नीतिवचनानि समुपलभ्यन्ते । पुराणादिग्रन्थेषु नीतिशास्त्रस्य प्रथमोद्भावकरूपेण ब्रह्म-विष्णु-महेश्वर-बृहस्पत्यादयः परिगण्यन्ते । अनन्तरं दैत्यगुरुः शुक्राचार्यः, महर्षिः वाल्मीकिः, बादरायणः, महामतिः विदुरः, विष्णुशर्मा, कामन्दकः, गुणाढ्यः, सोमदेवसूरिः, भर्तृहरिः, चाणक्यः इत्यादयो नैके नीतिशास्त्रकाराः प्रसिद्धाः सन्ति । एतेषां शुक्रनीतिः, कामन्दकीयनीतिसारः, विदुरनीतिः,

पञ्चतन्त्रम्, नीतिकल्पतरुः, बृहत्कथासारः, नीतिवाक्यामृतम्, नीतिशतकम्, चाणक्यनीतिः इत्यादिनीतिग्रन्था अद्यापि समुपलभ्यन्ते ।

**(अ) एकपदेन उत्तरयत**

(क) नीति-पदं कस्माद् धातोः निष्पद्यते ?

(ख) अर्थ-कामविषयिणी नीतिः का ?

(ग) दैत्यगुरुः कः अस्ति ?

(घ) चाणक्यस्य नीतिग्रन्थः कः ?

(ङ) विष्णुशर्मा कं नीतिग्रन्थं रचयामास ?

**(आ) एकवाक्येन उत्तरयत**

(क) नीतिः केषां प्रापिका वर्तते ?

(ख) धर्मो मोक्षश्च कस्या नीतेः विषयौ ?

(ग) भगवतः श्रीकृष्णचन्द्रस्य वचनं किम् ?

(घ) कुत्र नीतिशास्त्रस्य विशालं भाण्डागारं वर्तते ?

(ङ) कुत्र नीतिशास्त्रस्य विशालं भाण्डागारं वर्तते ?

**(इ) शिक्षकसाहाय्येन परस्परं मेलयत**

| **'अ' समूहः** | **'आ' समूहः** |
|---|---|
| पञ्चतन्त्रस्य रचयिता | कामदेवक्षेमेन्द्रः |
| नीतिशतकस्य रचयिता | सोमदेवसूरिः |
| कामन्दकीयनीतिसारस्य रचयिता | विद्यापतिः |
| नीतिकल्पतरो रचयिता | विष्णुशर्मा |
| नीतिवाक्यामृतस्य रचयिता | भर्तृहरिः |
| पुरुषपरीक्षाया रचयिता | शुक्राचार्यः |

११. **अधस्तनं नीतिपद्यं पठित्वा रिक्तस्थलं पूरयत**

**ऐश्वर्यस्य विभूषणं सुजनता शौर्यस्य वाक्संयमः,**

**ज्ञानस्योपशमः श्रुतस्य विनयो वित्तस्य पात्रे व्ययः ।**
**अक्रोधस्तपसः क्षमा प्रभवितुर्धर्मस्य निर्व्याजता,**
**सर्वेषामपि सर्वकारणमिदं शीलं परं भूषणम् ॥**

(क) सुजनता ऐश्वर्यस्य ......... वर्तते ।

(ख) ......... शौर्यस्य विभूषणं वर्तते ।

(ग) शान्तिः ......... विभूषणं वर्तते ।

(घ) ......... शास्त्रबोधस्य विभूषणं वर्तते ।

(ङ) सत्पात्रेभ्यो दानं ........... विभूषणं वर्तते ।

(च) ......... तपसो विभूषणं वर्तते ।

(छ) ......... सामर्थ्यवतः विभूषणं वर्तते ।

(ज) निर्व्याजता ......... विभूषणं वर्तते ।

(झ) शीलं सर्वेषामपि शोभनानां गुणानां कारणं ........... ।

(ञ) सर्वेषां ......... परं विभूषणं वर्तते ।

१२. **श्रमिकाणां त्रिविधेषु उत्तरेषु कतमं श्रेष्ठम्, तच्च किमर्थम् ? इति कक्षायां सतर्कं विमृशत ।**

## व्यवहारानुशीलनम्

१. कस्यचन महापुरुषस्य आदर्शमयं कथाप्रसङ्गं श्रावयित्वा तत्सन्देशं स्वजीवने कथम् अङ्गीकर्तुं शक्यते ? वर्णयत ।

२. स्वकार्येषु युष्माकं कथं प्रवृत्तिः भवति ? स्वविचारान् प्रकटयत ।

३. अस्य पाठस्य पठनानन्तरं व्यवहारे कीदृशं परिवर्तनं जायते, वदत ।

द्वितीयः पाठः

# त्याग एको गुणः श्लाघ्यः

**त्याग एको गुणः श्लाघ्यः किमन्यैर्गुणराशिभिः ।**

**त्यागाज्जगति पूज्यन्ते पशुपाषाणपादपाः ॥**

**पदच्छेदः-** त्यागः, एकः, गुणः, श्लाघ्यः, किम्, अन्यैः, गुणराशिभिः, त्यागाद्, जगति, पूज्यन्ते, पशुपाषाणपादपाः ।

**अन्वयः-** एकः (एव) श्लाघ्यः गुणः त्यागः (अस्ति), अन्यैः गुणराशिभिः किम् ? त्यागात् जगति पशुपाषाणपादपाः पूज्यन्ते ।

**अर्थः-** संसारे त्याग एव प्रशंसनीयो गुणः अस्ति । त्यागशीलः एव जनः संसारे पूज्यते । अन्यैः बहुभिः गुणैः युक्तः अपि मनुष्यः त्यागहीनो वर्तते चेत् स न पूज्यते । संसारे धेन्वादयः पशवः पिप्पलादयो वृक्षाः शालिग्रामादयः शिलाः अपि त्यागाद् एव संसारे देवरूपेण पूजिताः सन्ति ।

**भवन्ति नरकाः पापात् पापं दारिद्र्यसम्भवम् ।**

**दारिद्र्यमप्रदानेन तस्माद्दानपरो भवेत् ॥**

**पदच्छेदः-** भवन्ति, नरकाः, पापात्, पापम्, दारिद्र्यसम्भवम्, दारिद्र्यम्, अप्रदानेन, तस्मात्, दानपरः भवेत् ।

**अन्वयः-** नरकाः पापात् भवन्ति । पापं दारिद्र्यसम्भवम् (अस्ति) । अप्रदानेन दारिद्र्यं (भवति) । तस्माद् दानपरः भवेत् ।

**अर्थः-** मनुष्यः पापस्य कारणेन नरकं गच्छति अर्थात् यः पापं करोति स एव नरकं गच्छति । पापं दारिद्र्यस्य कारणेन जायते । यो दरिद्रो भवति स एव स्वस्य उदरपूरणार्थं पापकर्मणि संलग्नो भवति । दारिद्र्यं तु अप्रदानाद् जायते । यः स्वस्य धनस्य सञ्चयमेव करोति दानं न करोति स एव जनः अपरजन्मनि दरिद्रो भवति । अतः अप्रदानमेव नरकस्य मूलं कारणमस्ति ।

तस्मात् कारणात् सर्वैः मनुष्यैः दानशीलैः भवितव्यम् ।

**गौरवं प्राप्यते दानान्न तु वित्तस्य सञ्चयात् ।**

**स्थितिरुच्चैः पयोदानां पयोधीनामधः स्थितिः ॥**

**पदच्छेदः-** गौरवम्, प्राप्यते, दानात्, न, तु, वित्तस्य, सञ्चयात्, स्थितिः, उच्चैः, पयोदानाम्, पयोधीनाम्, अधःस्थितिः ।

**अन्वयः-** दानाद् गौरवं प्राप्यते । वित्तस्य सञ्चयात् तु न (प्राप्यते) । पयोदानां स्थितिः उच्चैः (अस्ति) । पयोधीनाम् स्थितिः अधः (अस्ति) ।

**अर्थः-** दानादेव जनाः गौरवं लभन्ते । दानस्य कारणेनैव जनानां प्रशंसा भवति । धनस्य सञ्चयेन जनः धनिकस्तु भवति परं तस्य प्रशंसाम् अन्ये न कुर्वन्ति । तस्य स्थानमपि तावदुच्चैः न भवति यथा दानशीलानां जनानां भवति । दानस्य कारणेनैव मेघाः सर्वदा उपरि तिष्ठन्ति चेत् केवलं सञ्चयस्यैव कारणेन समुद्राः सर्वदा अध एव तिष्ठन्ति ।

**दरिद्रान् भर कौन्तेय मा प्रयच्छेश्वरे धनम् ।**

**व्याधितस्यौषधं पथ्यं नीरुजस्य किमौषधैः ॥**

**पदच्छेदः-** दरिद्रान्, भर, कौन्तेय, मा, प्रयच्छ, ईश्वरे, धनम्, व्याधितस्य, औषधम्, पथ्यम्, नीरुजस्य, किम्, औषधैः ।

**अन्वयः-** कौन्तेय ! दरिद्रान् भर । ईश्वरे धनं मा प्रयच्छ । व्याधितस्य औषधं पथ्यं (भवति) । नीरुजस्य औषधैः किम् ?

**अर्थः-** हे युधिष्ठिर ! दरिद्रेभ्यः धनं दातव्यम् । (दरिद्रेभ्यः धनं दीयते चेत् दरिद्राः तुभ्यम् आशीर्वादं प्रयच्छन्ति ।) समर्थेभ्यः धनं न देयम् । रोगिणां कृते औषधम् अवश्यमेव रोगनिवारकं भवति, अतः आवश्यकं भवति । रोगविहीनानां कृते औषधस्य प्रयोजनं न भवति ।

**आयासशतलब्धस्य प्राणेभ्योऽपि गरीयसः ।**

**गतिरेकैव वित्तस्य दानमन्या विपत्तयः ॥**

**पदच्छेदः-** आयासशतलब्धस्य, प्राणेभ्यः, अपि, गरीयसः, गतिः, एका, एव, वित्तस्य, दानम्, अन्याः, विपत्तयः ।

**अन्वयः-** आयासशतलब्धस्य प्राणेभ्यः अपि गरीयसः वित्तस्य दानम् (इति) एका एव गतिः (उचिताः) अन्याः (गतयस्तु) विपत्तयः (भवन्ति) ।

**अर्थः**- धनार्जने अतीव परिश्रमः आवश्यको भवति । अतः जनानां कृते धनं प्राणेभ्यः अपि प्रियं भवति । तादृशस्य धनस्य दानरूपा एका एव गतिः उपयुक्ता भवति । अन्याः सञ्चयाद्याः गतयस्तु विपत्तिरूपाः भवन्ति ।

## शिक्षणालोकः

पाठस्याधारेण छात्राः दानस्य महत्त्वविषये बोधनीयाः । 'त्यागाद् उच्चस्थानं लभ्यते, अप्रदानात्तु दारिद्र्यं लभ्यते' इति विषयं ज्ञापयित्वा छात्राः त्यागार्थं प्रेरणीयाः । शिक्षकेण दानविषयकाः अन्ये श्लोका अन्वेषणीया, ततः तेषां तात्पर्यविषये च छात्रा अवबोधनीयाः ।

## अभ्यासः

### पाठानुशीलनम्

१. **शुद्धम् उच्चारयत**

श्लाघ्यः, पशुपाषाणपादपाः, दारिद्र्यम्, स्थितिरुच्चैः, प्रयच्छेश्वरे, आयासशतलब्धस्य

२. **पाठस्य द्वौ श्लोकौ शुद्धं श्रावयत ।**

३. **एकपदेन उत्तरयत**

(क) कः श्लाघ्यः गुणः ?

(ख) त्यागाद् जगति के पूज्यन्ते ?

(ग) दारिद्र्यं केन कारणेन भवति ?

(घ) केषां स्थितिरुच्चैः भवति ?

(ङ) कस्य औषधं पथ्यम् ?

(च) वित्तस्य एका गतिः का ?

४. **एकवाक्येन उत्तरयत**

(क) पशुपाषाणपादपाः केन कारणेन जगति पूज्यन्ते ?

(ख) पाप कुतः सम्भवति ?

(ग) कस्माद् गौरवं न लभ्यते ? कस्माच्च लभ्यते ?

(घ) उच्चैः स्थितिः केषाम्, अधः स्थितिश्च केषाम् ?

(ङ) ईश्वरे धनार्पणं श्रेय उत दरिद्रानां भरणं श्रेयः ?

(च) औषधं कस्य पथ्यम् ? कस्य औषधं निरर्थकम् ?

(छ) कीदृशस्य धनस्य दानमेव समुचिता गतिः ?

५. **'दरिद्रान् भर कौन्तेय' इत्यस्य श्लोकस्य तात्पर्यं प्रकाशयत ।**

६. **परस्परं मेलयत**

| | |
|---|---|
| पापात् | दारिद्र्यम् |
| दारिद्र्यात् | नरकाः |
| अप्रदानात् | पापम् |

७. **रिक्तस्थानं पूरयत**

(क) ............ एव प्रशंसनीयो गुणः अस्ति । (त्यागः, रागः, यागः)

(ख) पयोधीनां स्थितिः ......... भवति । (उच्चैः, अधः, मध्ये )

(ग) ......... धनं न प्रयच्छ । (दरिद्रे, बुभुक्षिते, ईश्वरे)

(घ) धनस्य दानाद् अन्या गतयः ........ सन्ति । (विपत्तयः, सम्पत्तयः, संगतयः)

८. **पदानि संशोध्य लिखत**

स्लाध्यः, गूणरासिभीः, पसुपाशाणपादपाः, स्थितीरूच्चैः, ब्याधितस्यौसधम् ।

९. **सत्यासत्यं विवेचयत**

(क) त्यागात् अन्ये गुणराशयः श्रेष्ठाः भवन्ति ।

(ख) धनस्य सञ्चयात् गौरवं प्राप्यते ।

(ग) नीरोगिणां कृते औषधस्य प्रयोजनं न भवति ।

(घ) धनस्य समुचिता गतिः दानमेव अस्ति ।

१०. **वाक्येषु प्रयोगं कुरुत**

पूज्यन्ते, नरकाः, वित्तस्य, प्रयच्छ, अपि

११. **कथां पठित्वा उत्तराणि लिखत**

द्वौ सुहृदौ आस्ताम् । तौ एकवारं मरुस्थले चलन्तौ आस्ताम् । मार्गं परितः वृक्षाः नासन्, जलमपि कुत्रापि नासीत् । चलतोः तयोः परस्परं विवादोऽभवत् । विवदतोः तयोरेकः अपरस्य मित्रस्य कपोले करतलेन प्राहरत् । तस्य ताडनेन पीडितः सुहृत्

किमपि नैव उक्तवान् । किन्तु बालुकायाम् अलिखत्, “अद्य मम प्रियः सखा मां प्राहरत् । येनाहमत्यन्तं दुःखितोऽस्मि ।” पुनस्तौ तूष्णीं चलितुम् प्रारब्धवन्तौ । यावद् जलाशयो न मिलति तावत् चलाव इति तौ प्रतिज्ञातौ आस्ताम् । बहुकालं गत्वा तौ जलाशयस्य समीपे प्राप्तवन्तौ । जलाशयस्य जलं शीतलं स्वच्छं चासीत् । तत्र स्नानाय तयोः सुहृदोः इच्छा अभूत् । यः पूर्वं सख्युस्ताडनेन दुःखित आसीत्, स जलाशये निमङ्कुतम् आरब्धवान् । सः प्लवनक्रीडायां निपुणो नासीत् । किन्तु तस्य सखा तं जले प्रविश्य तं रक्षितवान् । किञ्चित्कालानन्तरं ते ततः पुनः चलितुम् आरब्धवन्तौ । एकां महतीं शिलां दृष्ट्वा मज्जनाद् रक्षितः सुहृद् अलिखत्, “अद्य मम सखा मम प्राणानां रक्षां विहितवान्, अहं कृतकृत्योऽस्मि ।” एतद् दृष्ट्वा अपरः सखा उक्तवान्, “यदाहं त्वां प्राहरम्, तदा त्वं बालुकायाम् अलिखः, यदाहं त्वाम् अरक्षम् तदा च शिलायाम् । किमत्र रहस्यम् ?” इति । प्रथमः सुहृद् उत्तरितवान्, “यदा कश्चन अस्मान् पीडयति, तदा बालुकायां लेखनीयम्, यतः क्षमावातेन तद् शीघ्रं लुप्तं स्यात्, जनाः तं न पश्येयुः । किन्तु यदा कश्चन अस्माकं हितं करोति तदा शिलायां लेखनीयम्, यतः बहवः जनाः तस्य उपकारं जानीयुः । अस्माभिः सुहृदां दुर्गुणाः विस्मर्तव्याः, गुणाश्च स्मर्तव्याः” इति । एतद् श्रुत्वा अपरः सखा अतीव प्रसन्नो बभूव ।

**(क) एकपदेन उत्तरयत**

(अ) द्वौ सुहृदौ कुत्र चलन्तौ आस्ताम् ?

(आ) एकः सुहृद् अपरस्य कस्मिन् अङ्गे प्राहरत् ?

(इ) जलाशयस्य जलं कीदृशम् आसीत् ?

(ई) सख्युः सत्कार्यं कुत्र अलिखत् ?

(उ) अस्माभिः गुणाः विस्मर्तव्याः उत दुर्गुणाः ?

**(ख) एकवाक्येन उत्तरयत**

(अ) मरुस्थलम् कीदृशम् आसीत् ?

(आ) सख्युः ताडनेन दुःखितः सुहृत् किं कृतवान् ?

(इ) मज्जनाद् रक्षितः सुहृत् किम् अलिखत् ?

(ई) प्रथमः सुहृत् किम् उक्तवान् ?

(उ) अस्माभिः किं विस्मर्तव्यम्, किं च स्मर्तव्यम् ?

१२. **अधस्तनं श्लोकं पठित्वा शिक्षकस्य साहाय्येन अर्थं लिखत**

**दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य ।**
**यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति ॥**
**श्रोत्रं श्रुतेनैव न कुण्डलेन**
**दानेन पाणिर्न तु कङ्कणेन ।**
**विभाति कायः करुणापराणां**
**परोपकारेण न चन्देन ॥**

१३. **अधस्तनं पद्यं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत**

विदेशेषु धनं विद्या व्यसनेषु धनं मतिः ।
परलोके धनं धर्मः शीलं सर्वत्र वै धनम् ॥

**शब्दार्थाः**

(क) विद्या कुत्र धनरूपा भवति ?
(ख) व्यसनेषु धनं किम् अस्ति ?
(ग) कः परलोकस्य धनं किम् ?
(घ) किं सर्वत्र धनरूपं भवति ?
(ङ) 'व्यसनेषु' इत्यस्यार्थः कः ?

## व्यवहारानुशीलनम्

१. **दानात् प्रसिद्धिं प्राप्तस्य कस्यापि जनस्य चरितं सङ्क्षेपेण वर्णयत ।**
२. **'दानस्य महत्त्वम्' इति विषये एकम् अनुच्छेदं रचयत ।**
३. **किमर्थं त्यागः श्लाघ्यो गुणः अस्ति ? कक्षायां परामर्शं कुरुत ।**
४. **समुचितमुत्तरं (✓) चिह्नेन दर्शयत**

(क) **तव सख्युः पार्श्वे स्वल्पाहाराय धनं नास्ति चेत् त्वं किं करोषि ?**

(अ) अहमेव खाद्यं क्रीत्वा खादामि ।
(अ) अहम् अपि स्वल्पाहारं नैव खादामि ।

(इ) स्वस्य धनेन स्वल्पाहारं क्रीत्वा सख्या सह मिलित्वा खादामि ।

(ई) सख्या सह गृहं गच्छामि ।

**(ख) तव पार्श्वे अधिकं धनम् अस्ति चेत् किं करोषि ?**

(अ) मनोरञ्जनस्य सामग्रीः क्रीणामि ।

(आ) मञ्जूषायां स्थापयामि ।

(इ) अधिकं व्ययं करोमि ।

(ई) दीनानां सहयोगं करोमि ।

**(ग) केनचन उपहृतं वस्त्रं तुभ्यं न रोचते चेत् त्वं किं करोषि ?**

(अ) कस्मैचन दीनाय प्रयच्छामि ।

(आ) दुःखितः सन् धारयामि ।

(इ) स्थापयामि किन्तु नैव धारयामि ।

(ई) यः उपहृतवान्, तस्मै एव उपहरामि ।

**(घ) आपणिकः अधिकानि रुप्यकाणि प्रतिदत्तवान्, त्वं किं करोषि ?**

(अ) तद् आनीय शीघ्रं गृहं गच्छामि ।

(आ) आपणिकाय एव ददामि ।

(इ) तेन धनेन मिष्टान्नं क्रीत्वा खादामि ।

(ई) सख्या सह मिलित्वा मनोरञ्जनं करोमि ।

तृतीयः पाठः

# मित्राणां पारस्परिकं साहाय्यम्



एकं घनं वनम् आसीत् । तत्र अनेके पशवः पक्षिणश्च आसन् । तेषु हरिणः, कच्छपः, मूषकः, काकश्च चत्वारि मित्राणि आसन् । तेषु परस्परम् अत्यन्तं प्रबला मैत्री आसीत् । प्रतिसायं ते एकत्रीभूय दिनस्य सर्वाः घटनाः परस्परं श्रावयन्ति स्म ।

एकदा हरिणः अत्यन्तं भीतः आसीत् । हरिणः मित्राणि अकथयत्– "आखेटकाः सर्वत्र जालानि प्रसारयन्तः सन्ति । पलायनस्य उपायः न दृश्यते ।" काकः अकथयत्, "भविष्यति पलायनस्य उपायः । उपायं बन्धुः मूषकः अपि जानाति । चिन्ता मास्तु ।" काकः पूर्वतनीम् एकां कथाम् अश्रावयत् ।

केभ्यश्चित् दिनेभ्यः पूर्वम् एकाम् आश्चर्यमयीं घटनाम् अपश्यम्। आखेटकस्य जालपाशे कपोतसमूहः बद्धः आसीत्। सर्वे कपोताः स्वचञ्चुना जालस्य एकैकं तन्तुं गृहीत्वा जालं नीत्वा गगने उड्डयनम् अकुर्वन्। ते उड्डीय एकस्य मित्रस्य मूषकस्य गृहम् अगच्छन्। मूषकः दन्तैः जालम् अकर्तयत्। जालपाशात् कपोतानां मुक्तिः अभवत्।

कथायाः समाप्त्यनन्तरं हि हरिणः जलार्थं गतः। अन्यानि मित्राणि च स्वेच्छया फलपत्रादिकं भोक्तुं इतस्ततः अगच्छन्। सायङ्काले सर्वे पुनः पूर्वस्थाने सम्मिलिता परन्तु चिरकालं यावत् तत्त हरिणः नागतः। तदा ते चिन्ताकुलाः अभवन्। प्रातःकालः सञ्जातः तथापि हरिणः नागतः। काकः तस्य अन्वेषणार्थं गतः। स तडागस्य निकटे जालबद्धं हरिणं दृष्ट्वा मित्रे कच्छपं मूषकं च असूचयत्। मूषकः काकपृष्ठम् आरुह्य हरिणस्य पार्श्वे गतः। स जालम् अकृन्तत्। कच्छपः अपि तत्र प्राप्नोत् परन्तु तदानीमेव आखेटकश्च तत्र सम्प्राप्तः। सर्वे पलायनम् अकुर्वन्।



मन्दगतिः कच्छपः पलायितुं नाशक्नोत्। आखेटकः कच्छपं बद्ध्वा स्वस्कन्धे स्थापयित्वा गृहं प्रति प्रस्थितः। तद् दृष्ट्वा पुनः सर्वाणि मित्राणि चिन्ताकुलानि अभवन्।

काकः, मूषकः, हरिणश्च सम्भूय एकम् उपायम् अचिन्तयन्। उपायानुसारेण हरिणः किञ्चिद् अग्रे तडागस्य समीपं गत्वा मृतः इव सुप्तः। काकः हरिणस्य शरीरे स्थित्वा उल्लिखन् इव आसीत्। आखेटकः मृतं हरिणं अग्रे दृष्ट्वा कच्छपं तत्रैव भूमौ स्थापयित्वा तं प्रति गतः। तदानीमेव मूषकः कच्छपस्य बन्धनम् अकृन्तत्। कच्छपः सपदि निकटस्थं तडागं प्राविशत्। काकः उड्डीय गतः। हरिणश्च उत्थाय पलायनम् अकरोत्। आखेटकः खिन्नमनाः गृहं

न्यवर्तत । सर्वेषां मित्राणां जीवनं सुरक्षितम् अभवत् । मित्रेषु परस्परं साहाय्यं शत्रूणां पराजयस्य कारणं भवतीति बुद्ध्वा चत्वारि मित्राणि पुनः सम्मिल्य वने आनन्देन न्यवसन् ।

## शिक्षणालोकः

सदैव परस्परं साहाय्यभावेन व्यवहर्तुं छात्राः प्रेरणीयाः । मित्रेषु परस्परं साहाय्येन यस्मिन् कस्मिन् अपि कार्ये साफल्यं सहजतया लभ्यत इति च ते बोधनीयाः ।

## अभ्यासः

## पाठानुशीलनम्

१. **सङ्क्षेपेण उत्तरयत**

(क) वने के आसन् ?

(ख) वनं कीदृशम् आसीत् ?

(ग) काकः किम् अश्रावयत् ?

(घ) जालपाशे कः बद्धः आसीत् ?

(ङ) सर्वे कपोताः किम् अकुर्वन् ?

(च) बन्धुः मूषकः अपि किं जानाति ?

(छ) मूषकः कैः जालं खण्डितम् अकरोत् ?

(ज) वने चतुर्षु मित्रेषु कीदृशी मैत्री आसीत् ?

(झ) चत्वारि मित्राणि प्रतिसायं किं कुर्वन्ति स्म ?

(ञ) आखेटकाः कुत्र जालानि प्रसारयन्तः आसन् ?

२. **पाठाधारेण संशोध्य लिखत**

(क) मूषकः जालम् अकृन्तत् ।

(ख) काकः मूषकस्य अन्वेषणार्थं गतः ।

(ग) मन्दगतिः कच्छपः पलायितुं नाशक्नोत् ।

(घ) प्रातःकालः सञ्जातः तथापि हरिणः नागतः ।

(ङ) आखेटकः मूषकं बद्ध्वा स्वस्कन्धे अस्थापयत् ।

(च) कथायाः समाप्त्यनन्तरं हि कच्छपः जलार्थं गतः ।

(छ) मूषकः काकपृष्ठम् आरुह्य कच्छपस्य पार्श्वे गतः ।

(ज) काकः तडागस्य निकटे जालबद्धं हरिणम् अपश्यत् ।

**३. पाठस्य सस्वरवाचनं कुरुत ।**

**४. पाठस्य कथायाः सन्देशं श्रावयत ।**

**५. पाठाधारेण मञ्जूषातः विशेषणपदानि चित्वा लिखत**

(क) एकम् ..................

(ख) हरिणम् ..................

(ग) तडागम् ..................

(घ) आखेटकः ..................

(ङ) मित्राणि ..................

**मञ्जूषा**

| |
|---|
| **एकम्, मृतम्, निकटस्थम्, खिन्नमनाः, चत्वारि** |

**६. पाठाधारेण रिक्तस्थानं पूरयत**

(क) सर्वाणि ............ चिन्ताकुलानि ............ ।

(ख) तदानीमेव ............ कच्छपस्य ............ अकृन्तत् ।

(ग) काकः ............ शरीरे स्थित्वा उल्लिखन् इव ............ ।

(घ) ............ हरिणः ............ अग्रे ............ समीपे अगच्छत् ।

(ङ) काकः, ............ हरिणश्च सम्भूय एकम् ............ अचिन्तयन् ।

७. **अधस्तनानि पदानि प्रयुज्य नवीनानि वाक्यानि रचयत**

वनम्, अनेके, मूषकः, मित्राणि, परस्परम्, एकत्र, घटनाः, श्रावयन्ति, एकदा, भीतः, आखेटकः, सर्वत्र, उपायः, बन्धुः, अपि, चिन्ता, कथाम् ।

८. **शुद्धम् उच्चारयत**

केभ्यश्चित्, आश्चर्यमयीम्, स्वचञ्चुना, उड्डयनम्, समाप्त्यनन्तरम्, सायङ्काले, प्रतीक्षमाणाः, चिन्ताकुलाः, प्रातःकालः, अन्वेषणार्थम्, जालबद्धम्, आरुह्य, मन्दगतिः, स्वस्कन्धे, प्रस्थितः, दृष्ट्वा ।

९. **पर्यायं विचित्य लिखत**

(क) काकः = ................ (वायसः, गृधः, चटकः)

(ख) तडागः = ................ (सरित्, कूपः, सरोवरः)

(ग) समीपे = ................ (दूरे, निकटे, नीचैः)

(घ) सुप्तः = ................ (जागरितः, उत्थितः, शयितः)

(ङ) आखेटकः = ................ (व्याधः, आसन्दः, आकारः)

(च सपदि = ................ (सत्यम्, सम्यक्, शीघ्रम्)

(छ) साहाय्यम् = ................ (सुकरम्, सहयोगः, समानम्)

(ज) आनन्दः = ................ (सुखम्, सामान्यम्, सायम्)

१०. **मञ्जूषायाः पदं चित्वा उचितस्थले लिखत**

(क) ................ = प्रथमा, कहुवचनम्

(ख) ................ = षष्ठी, एकवचनम्

(ग) ................ = चतुर्थी, बहुवचनम्

(घ) ................ = प्रथमा, एकवचनम्

(ङ) ................ = तृतीया, एकवचनम्

(च) ................ = सप्तमी, बहुवचनम्

(छ) ................ = षष्ठी, बहुवचनम्

(ज) ................ = सप्तमी, एकवचनम्

(झ) ................ = प्रथमा, बहुवचनम्

(ञ) ................ = द्वितीया, एकवचनम्

**मञ्जूषा**

| **पशवः, चत्वारि, तेषु, भीतः, पलायनस्य, उपायम्, दिनेभ्यः, स्वचञ्चुना, गगने, कपोतानाम्** |
|---|

११. **पठित्वा प्रश्नान् उत्तरयत**

प्राणी सदैव प्राणान् धारयितुम् इच्छति । प्राणानां धारणेनैव अस्य विशेषणं प्राणी इति वर्तते । प्राणधारणाय स आहारं गृह्णाति । आहारार्थञ्च कर्म आवश्यकं भवति । अतः स कर्म करोति ।

कर्म द्विविधं वर्तते । शुभम्, अशुभञ्च । ये शुभं कर्म कुर्वन्ति, ते सदा शुभमेव फलं प्राप्नुवन्ति । ये तु अशुभम् आचरन्ति, तेषां जीवनं कष्टकरं भवति । अशुभकर्मिणः अस्मिन् लोके परलोके च अशुभमेव कर्मफलं प्राप्स्यन्ति । अतः सदैव शुभं कर्म करणीयमिति शास्त्रं समुपदिशति । रामादिवद्वर्तितव्यं न तु रावणादिवत् इति श्रूयते । तस्मात् तदेव कर्तव्यम्, यत् शुभं वर्तते, यत्फलञ्च शुभमेव भविष्यति ।

(अ) **एकपदेन उत्तरयत**

(क) कः प्राणान् धारयितुम् इच्छति ?

(ख) प्राणी प्राणधारणाय किं गृह्णाति ?

(आ) **एकवाक्येन उत्तरयत**

(क) कर्म कतिविधं वर्तते ?

(ख) ये शुभं कर्म कुर्वन्ति, ते किं प्राप्नुवन्ति ?

(ग) केषां जीवनं कष्टकरं भवति ?

(घ) शास्त्रं किं समुपदिशति ?

**(इ) अधस्तनस्य वाक्यस्य विवेचनं कुरुत**

रामादिवद्वर्तितव्यं न तु रावणादिवत् ।

**१२. अधस्तनं नीतिपद्यं पठित्वा रिक्तस्थलं पूरयत**

हस्तस्य भूषणं दानं सत्यं कण्ठस्य भूषणम् ।

श्रोत्रस्य भूषणं शास्त्रं भूषणैः किं प्रयोजनम् ? ॥

(क) हस्तस्य भूषणं ......... वर्तते ।

(ख) ......... कण्ठस्य भूषणं वर्तते ।

(ग) श्रोत्रस्य ......... भूषणं वर्तते ।

(घ) अन्येषां भूषणानां ......... नास्ति ।

## व्यवहारानुशीलनम्

१. श्रुतपूर्वां काञ्चन नीतिकथां श्रावयित्वा ततः प्राप्तं सन्देशं वक्तुं मित्राणि प्रेरयत ।

२. समाजे परस्परं मिलित्वा निवसनस्य के लाभाः भवन्ति, कक्षायां विमृशत ।

३. पाठस्य कथायां चतुर्षु मित्रेषु मध्ये कस्य साहाय्यम् अधिकतरं मूल्यवद् आसीदिति सतर्कं प्रस्तुत ।

४. अस्य पाठस्य पठनानन्तरं स्वकीये विचारे समागतं परिवर्तनं व्यवहारेण प्रदर्शयत ।

चतुर्थः पाठः

# सर्वदेवमयोऽतिथिः

**अरावप्युचितं कार्यमातिथ्यं गृहमागते ।**

**छेत्तुः पार्श्वगतां छायां नोपसंहरते द्रुमः !**

**पदविभागः-**

अरौ, अपि, उचितम्, कार्यम्, आतिथ्यम्, गृहम्, आगते, छेत्तुः, पार्श्वगताम्, छायाम्, न, उपसंहरते, द्रुमः !

**अन्वयः-**

गृहम् आगते अरौ अपि उचितं आतिथ्यं कार्यम् । छेत्तुः पार्श्वगतां छायाम् अपि द्रुमः न उपसंहरते !

**सरलार्थः-**

गृहस्थैः गृहे आगतानां शत्रूणाम् अपि यथोचितम् आतिथ्यं कर्तव्यम् । वृक्षः स्वम् एव छेत्तुम् आगतस्य जनस्य सन्निधाने प्राप्तायाः छायायाः अपि सङ्कोचनं न करोति । स छायया छेदकाय अपि शीतलतां प्रददाति ।

**तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता ।**

**एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन !**

**पदविभागः-**

तृणानि, भूमिः, उदकम्, वाक्, चतुर्थी, च, सूनृता, एतानि, अपि, सताम्, गेहे, न, उच्छिद्यन्ते, कदाचन !

**अन्वयः-**

तृणानि, भूमिः, उदकम्, चतुर्थी सूनृता वाक् च एतानि सतां गेहे कदाचन न उच्छिद्यन्ते !

**सरलार्थः-**

तृणनिर्मितम् एव किं न स्यात् तादृशम् आसनम्, उपवेशनाय स्थानम्, पेयं जलम्, सुमधुरा वाणी चेति चत्वारि तत्वावानि अतिथिसत्काराय पर्याप्तानि भवन्ति। सज्जनाः एतैरेव वस्तुभिः यथोचितं अतिथिसत्कारं कुर्वन्ति एव। धनं नास्ति इति विचार्य सज्जनाः कदाचिदपि अतिथिसत्काराद् विमुखा न भवन्ति।

**बालो वा यदि वा वृद्धो युवा वा गृहमागतः।**
**तस्य पूजा विधातव्या सर्वस्याभ्यागतो गुरुः!**

**पदविभागः-**

बालः, वा, यदि, वा, वृद्धः, युवा, वा, गृहम्, आगतः, तस्य, पूजा, विधातव्या, सर्वस्य, अभ्यागतः, गुरुः!

**अन्वयः-**

गृहम् आगतः (जनः) बालः, वृद्धः, युवा वा (भवेत्), तस्य पूजा विधातव्या। अभ्यागतः सर्वस्य गुरुः (अस्ति)!

**सरलार्थः-**

गृहे बालकः आगतः स्यात्, वृद्धः आगतः स्यात्, उत युवकः आगतः स्यात्, गृहे आगतः यः कोऽपि अतिथिः भवति। गृहे प्राप्तस्य तादृशस्य यस्य कस्यापि अतिथिरूपस्य जनस्य सत्कारः अवश्यमेव कर्तव्यः। यादृशः अपि स्यात्, गृहम् आगतः अतिथिः सर्वेषां कृते पूजनीयो भवति।

**अतिथिर्यस्य भग्नाशो गृहात् प्रतिनिवर्तते।**
**स तस्मै दुष्कृतं दत्त्वा पुण्यमादाय गच्छति!**

**पदविभागः-**

अतिथिः, यस्य, भग्नाशः, गृहात्, प्रतिनिवर्तते, सः, तस्मै, दुष्कृतम्, दत्त्वा, पुण्यम्, आदाय, गच्छति!

**अन्वयः-**

यस्य गृहाद् अतिथिः भग्नाशः(सन्) प्रतिनिवर्तते, स तस्मै दुष्कृतं दत्त्वा पुण्यम् आदाय गच्छति!

**सरलार्थः-**

यस्य जनस्य गृहाद् अतिथिः विमुखः सन् प्रत्यावर्तते, तस्मै जनाय सः अतिथिः स्वकीयं पापं प्रददाति । तस्य जनस्य पुण्यं च सः अतिथिः स्वयम् आदाय गच्छति । अतः अतिथिः कदापि विमुखः न प्रत्यावर्तनीयः ।

**उत्तमस्यापि वर्णस्य नीचोऽपि गृहमागतः ।**
**पूजनीयो यथायोग्यं सर्वदेवमयोऽतिथिः !**

**पदविभागः-**

उत्तमस्य, अपि, वर्णस्य, नीचः, अपि, गृहम्, आगतः, पूजनीयः, यथायोग्यम्, सर्वदेवमयः, अतिथिः !

**अन्वयः-**

उत्तमस्य वर्णस्य गृहम् आगतः नीचः अपि यथायोग्यं पूजनीयः, (यतः) अतिथिः सर्वदेवमयः (भवति) !

**सरलार्थः-**

समाजे या जातिः उत्कृष्टा मता वर्तते, तस्याः जातेः जनस्य गृहे निकृष्टत्वेन व्यवह्रियमाणायाः जातेः जनः आगतः वर्तते चेद् अपि आगतः सः अतिथिः एव भवति, जनैः तादृशस्य अतिथेः अपि यथायोग्यं सत्कारः कर्तव्यः एव, यतः अतिथेः शरीरे सर्वेषां देवानां निवासः भवति ।

## शिक्षणालोकः

पाठस्याधारेण छात्राः आतिथ्यस्य महत्त्वविषये बोधनीयाः । 'अतिथिर्देवतुल्यो भवति' इति विषयं ज्ञापयित्वा छात्राः अतिथिसत्काराय सदैव प्रेरणीयाः । शिक्षकेण अतिथेर्महत्त्वसूचका अन्ये श्लोका अन्वेषणीया, ततः तेषां तात्पर्यविषये च छात्रा अवबोधनीयाः ।

## अभ्यासः

### पाठानुशीलनम्

१. **शुद्धम् उच्चारयत**

आतिथ्यम्, छेत्तुः, सूनृता, नोच्छिद्यन्ते, विधातव्या, दुष्कृतम्, वर्णस्य, यथायोग्यम् ।

२. **शिक्षकमनुसृत्य सलयं वाचयत**

अतिथिर्यस्य भग्नाशो गृहात् प्रतिनिवर्तते ।
स तस्मै दुष्कृतं दत्त्वा पुण्यमादाय गच्छति ॥

३. **अधस्तनस्य पद्यस्य अन्वयं कथयत**

बालो वा यदि वा वृद्धो युवा वा गृहमागतः ।
तस्य पूजा विधातव्या सर्वस्याभ्यागतो गुरुः ॥

४. **प्रदत्तस्य पद्यस्य सरलार्थं प्रकाशयत**

उत्तमस्यापि वर्णस्य नीचोऽपि गृहमागतः ।
पूजनीयो यथायोग्यं सर्वदेवमयोऽतिथिः ॥

५. **एकपदेन उत्तरयत**

(क) गृहमागते अरौ अपि किं कार्यम् ?

(ख) पानाय अतिथये किं देयम् ?

(ग) कः सर्वस्य गुरुरस्ति ?

(घ) भग्नाशः अतिथिः किं दत्त्वा गच्छति ?

(ङ) अतिथिः कीदृशो भवति ?

६. **एकवाक्येन उत्तरयत**

(क) द्रुमः कुत्रत्यां छायां नोपसंहरते ?

(ख) सतां गेहे कानि नोच्छिद्यन्ते ?

(ग) कस्य पूजा विधातव्या ?

(घ) कीदृशः अतिथिः पुण्यमादाय गच्छति ?

(ङ) को यथायोग्यं पूजनीयः ?

७. **'सर्वस्याभ्यागतो गुरुः' इत्यस्य पद्यांशस्य आशयं प्रकटयत ।**

८. **अधोऽङ्कितं पद्यमाधृत्य अतिथिसत्कारविधिं स्वभाषया निर्दिशत ।**

तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता ।
एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन !

९. **वैपरीत्यमाधृत्य परस्परं मेलयत**

| | |
|---|---|
| उत्कृष्टः | आददाति |
| उत्तमः | कदाचन |
| पुण्यम् | नीचः |
| प्रददाति | निकृष्टः |
| सदा | पापम् |

१०. **रिक्तस्थानं पूरयत**

(क) ............. स्वस्य छेदकाय अपि शीतलतां प्रददाति ।

(ख) अतिथीन् प्रति .......... वाणी प्रयोक्तव्या ।

(ग) अतिथिः .......... कृते पूजनीयो भवति ।

(घ) आशाविमुखः अतिथिः ........ ददाति ।

(ङ) अतिथेः सर्वेषां ........... निवासो भवति ।

११. **पौरस्त्यसंस्कृतौ अतिथिसत्कारस्य महत्त्वं कीदृशमस्ति ? स्वभाषया अनुच्छेदमेकं रचयत ।**

१२. **अतिथिसत्कारसम्बद्धां कामपि एकां कथाम् अन्विष्य लिखत ।**

१३. **'अतिथिदेवो भव' इत्यस्मिन् शीर्षके एकमनुच्छेदं रचयत ।**

१४. **पदानि संशोध्य लिखत**

पार्ष्वगताम्, चतूर्थी, वृध्दः, पुजा, सर्वश्य, प्रतीनिवर्तते, दुश्कृतम्, पूजनियः, उतमस्य ।

१५. **सत्यं चेत् यथातथम्, असत्यं चेत् सत्यं कृत्वा अधस्तनानि वाक्यानि अनुलिखत**

(क) गृहम् आगते मित्रे एव यथोचितम् आतिथ्यं कर्तव्यम् ।

(ख) सूनृता वाणी कस्यापि पार्श्वे न भवति ।

(ग) भग्नाशः अतिथिः पुण्यं प्रदाय गच्छति ।

(घ) गृहम् आगतो जनः बालः, युवा, वृद्धो वा स्यात्, तस्य पूजा कर्तव्या ।

**१६. कथां पठित्वा उत्तराणि लिखत**

रन्तिदेवनामक एको राजा आसीत् । स दाने अतिथिसत्कारे ख्यातनामा आसीत् । कदाचित् तस्य राज्ये अनावृष्ट्या अन्नाभावः समापतत् । तस्याम् अवस्थायां सर्वस्वदानेन राजाऽपि दरिद्रः अभवत् । क्षुधया तृषया बहु पीडितः अपि स धैर्यं न अत्यजत् । सपरिवारः सः अन्नेन जलेन च विना स बहूनि दिनानि अयापयत् ।

प्राणसङ्कटे समुत्पन्ने स कदाचित् भोजनसामग्रीम् अलभत् । स पत्न्या पुत्रेण च सह भोजनं कर्तुम् उद्यतः आसीत् । तस्मिन्नेव समये कश्चन बुभुक्षितो ब्राह्मण आगच्छत् । स भोक्तुकामं राजानं प्रति स्वस्य अवस्थां निवेद्य भोजनम् अयाचत । राजा अतिथिसत्कारं विना कथं भोक्तुं शक्नोति स्म ? स ब्राह्मणाय यथेष्टं भोजनम् अददात् । ब्राह्मणो भोजनानन्तरं राजानम् आशीर्भिः संयोज्य निरगच्छत् । अनन्तरम् अवशिष्टं भोजनं भोक्तुकामस्य सपरिवारस्य रन्तिदेवस्य अग्रे पुनः एकः शूद्रः आगच्छत् । स च बुभुक्षया पीडितः आसीत् । सोऽपि राजानं भोजनम् अयाचत । तमपि अतिथिं मत्वा तस्मै अपि यथेष्टं भोजनं प्रदत्तवान् । पुनश्च अवशिष्टं भोजनं भोक्तुम् उद्यतस्य राज्ञः पार्श्वे कोऽपि चाण्डालः कैश्चित् शुनकैः सह तत्र प्रापत् । राजा तस्य चाण्डालस्य शुनकानां च आतिथ्यं कृत्वा सशुनकाय तस्मै समग्रमपि भोजनं प्रायच्छत् ।

इतः परं राज्ञः पार्श्वे स्वस्य पुत्रकलत्राणां च बुभुक्षायाः शमनाय केवलं किञ्चद् जलम् आसीत् । तत् पातुम् आरभमाणस्य राज्ञः समीपे 'पिपासिताय मह्यं जलं देहि' इति कथयन् कश्चन जनः आगच्छत् । तस्या आतिथ्यार्थं राजा समग्रमपि जलं तस्मै प्रदत्तवान् । एवं प्राणसङ्कटेऽपि 'अतिथिदेवो भव' इति उपनिषद्वाक्यं संस्मृत्य आतिथ्यपरस्य राज्ञो रन्तिदेवस्य कीर्तिः अद्यापि प्रसृता वर्तते ।

**(क) एकपदेन उत्तरयत**

(अ) राज्ञो नाम किम् आसीत् ?

(आ) प्रथमवारं भोजनं कर्तुम् आरभमाणस्य रन्तिदेवस्य अग्रे कः आगच्छत् ?

(इ) शूद्रः केन पीडितः आसीत् ?

(ई) कः शुनकैः सह राज्ञः समीपं प्रापत् ?

(उ) भोजनसमाप्त्यनन्तरं बुभुक्षाशमनाय राज्ञः पार्श्वे किम् आसीत् ?

**(ख) एकवाक्येन उत्तरयत**

(अ) रन्तिदेवः कुत्र ख्यातनामा आसीत् ?

(आ) रन्तिदेवः कथं दरिद्रः अभवत् ?

(इ) रन्तिदेवः कस्याम् अवस्थायाम् आसीत् ?

(ई) ब्राह्मणः कथं ततो निरगच्छत् ?

(उ) राजा कस्मै समग्रमपि भोजनं प्रदत्तवान् ?

(ऊ) जलं पातुम् आरभमाणस्य रन्तिदेवस्य अग्रे का घटना घटिता ?

(ए) रन्तिदेवस्य कीर्तिः अद्यापि कथं प्रसृता अस्ति ?

१७. **अधस्तनं श्लोकांशं पठित्वा शिक्षकस्य साहाय्येन गृहस्थाश्रमस्य महिमानं दर्शयत**

आतिथ्यं शिवपूजनं प्रतिदिनं मिष्टान्नपानं गृहे
साधोः सुङ्गमुपासते च सततं धन्यो गृहस्थाश्रमः ॥

## व्यवहारानुशीलनम्

१. गृहमागतस्य अतिथेः परितोषाय यूयं किं किं कुरुथ ? सूचीं निर्माय प्रदर्शयत ।

२. ‘अतिथिदेवो भव’ इति उपनिषद्वाक्यं पुरस्कृत्य चलन्ती पौरस्त्यसंस्कृतिः आतिथ्यं देवपूजनं मनुते । तस्या एव संस्कृतेः परिपालके अस्माकं देशे पान्थानां कृते वासप्रदानस्य परम्परा आसीत् । एषा परम्परा अधुना लुप्तप्राया अनुभूयते । अधुना तु पान्थानां कृते वैतनिकानां वासगृहाणां व्यवस्था प्रायेण सर्वत्र विहिता दृश्यते । युष्माकं विचारे एतादृशी वासप्रदानपरम्परा समुचिता अस्ति उत अनुचिता ? स्वतर्कं प्रस्तुत ।

३. समुचितमुत्तरं (✓) चिह्नेन दर्शयत

**(क) गृहे त्वमेव वर्तसे । कश्चिद् अतिथिः आगच्छत् चेत् त्वं किं करोषि ?**

(अ) मातापितरौ गृहे न स्तः इति कथयित्वा प्रत्यावर्तयामि ।

(अ) स्वागतं विधाय जलादिकं ददामि ।

(इ) किमपि अकृत्वा तूष्णीं तिष्ठामि ।

**(ख) गृहं प्राप्तः अतिथिः उपहारादिकं किमपि नानीतवान् अस्ति चेत् त्वं किं करोषि ?**

(अ) 'उपहारं किमर्थं नानीतवान् ?' इति पृच्छामि ।

(आ) द्वारं पिधाय अतिथिं गृहे न प्रवेशयामि ।

(इ) स्वागतमेव करोमि ।

**(ग) गृहं प्राप्तः अतिथिः उपहारम् आनीतवान् अस्ति चेत् त्वं किं करोषि ?**

(अ) 'किमर्थं दुःखं विहितम्, एतस्य का आवश्यकता ?' इति कथयामि ।

(आ) शीघ्रम् आच्छिद्य गृह्णामि ।

(इ) 'केवलम् एतावदेव ? अन्यत् किमपि नास्ति ?' इति कथयामि ।

**(घ) 'अतिथिः देवतुल्यो भवति, अतः अतिथेः सेवा देवपूजा वर्तते ।' इति वाक्ये तव विश्वासः कीदृशः अस्ति ?**

(अ) दृढः (आ) सन्देहास्पदः (इ) अविश्वासः ।

पञ्चमः पाठः

# स्वसंस्कृतेः संरक्षणम्

आर्या सद्योजातश्च मित्रे स्तः। आर्या स्वस्यैव ग्रामस्य एकस्मिन् विद्यालये पठति। सद्योजातस्तु अपरस्मिन् ग्रामे मातुलगृहे स्थित्वा पठति। तौ सप्तमकक्षायां पठतः। तौ स्वविद्यालयस्य उत्तमौ छात्रौ स्तः। अद्य शनिवासरः अस्ति। सद्योजातः अपि ह्यः सायं स्वगृहम् आगतवान् अस्ति। प्रातः आर्या सद्योजातस्य गृहस्य मार्गेण एव क्वचित् गच्छन्ती भवति। गृहस्य अग्रे तयोः मेलनं भवति। ततः

**सद्योजातः –** आर्ये ! कुत्र गच्छसि ?

**आर्या –** निकटस्थं गुरुकुलं प्रति गच्छामि।

**सद्योजातः –** शनिवासरे अपि विद्यालयस्य परिधानेन सज्जीभूय, किमर्थम् ? अद्य गुरुकुले कश्चिद्विशेषः ?



**आर्या –** कारणम् अस्ति परिधानधारणस्य । गुरुकुलेन छात्राणां वक्तृत्वकला-प्रतियोगिता आयोजयिष्यमाणा वर्तते । तत्र दशाधिकानां विद्यालयानां सहभागिता भविष्यतीति श्रूयते । अहमपि मम विद्यालयस्य पक्षतः प्रतियोगितायां भागं ग्रहीतुं गच्छन्ती अस्मि ।

**सद्योजातः –** अहो ! उत्तमं तावत् । प्रतियोगितायाः विषयः कः ?

**आर्या –** विषयः ? अद्यतनः विषयः निर्धारितः अस्ति- 'स्वसंस्कृतेः संरक्षणम्' इति ।

**सद्योजातः –** अहमपि गन्तुं शक्नोमि वा ? अयन्तु ममापि रुचिविषयः ।

**आर्या –** कथं न ? आगच्छ तर्हि, सहैव गच्छाव । (गच्छतः)

**सद्योजातः –** आर्ये ! वक्तृत्वकलायाः कृते सज्जता कीदृशी अस्ति ?

**आर्या –** सम्यक् एव अस्ति । सज्जता यथाज्ञानं सम्पादिता अस्ति । अस्मिन् विषये त्वमपि किञ्चित् कथय नु, मम कृते साहाय्यं भविष्यति ।

**सद्योजातः –** अवश्यं कथयामि । तत्पूर्वं स्वसज्जतानुसारेण किञ्चित् श्रावय । तदनु कानिचित् सूत्राणि अहमपि कथयिष्यामि ।

**आर्या –** उचितम् । स्वसंस्कृतेः संरक्षणाय प्रथमतः स्वदैनिकजीवने एतस्याः पालनं करणीयम् । स्वयं परिपाल्य अन्ये च पालनाय प्रेरणीयाः । तदर्थम् एतस्याः महत्त्वञ्च प्रकाशनीयम् ।

**सद्योजातः –** एतावदेव न । संस्कृतौ या विकृतिः परिदृश्यते, तस्या अपनयनाय च प्रयत्नः करणीयः । अस्माकं समाजे कतिपयैः सभ्यतारूपेण परसंस्कृतिरपि अवलम्बिता



अनुभूयते । तद्वस्तुतः अस्माकं संस्कृतौ विकृतिः खलु ।

**आर्या –** यथा ?

**सद्योजातः –** यथा जन्मोत्सवे दीपज्वालनम् अस्माकं संस्कृतिः वर्तते परन्तु कतिपये जनाः दीपान् प्रज्वाल्य सपदि निर्वापयन्ति । आधुनिकैः अङ्गीकृता इयं परसंस्कृतिः अस्माकं संस्कृतौ विकृतिः एव । एतद्दिने अष्टचिरञ्जीविनां पूजनम्, मान्यजनेभ्यः आशीर्वादग्रहणञ्च स्वसंस्कृतिः परन्तु केक नामकद्रव्यकर्तनपूर्वकं करतलवादनं परसंस्कृतिः ।

**आर्या –** बाढं बाढम् । मातृदेवो भव, पितृदेवो भव इति अस्माकं संस्कृतेः आदर्शवचनानि । अतः मातापित्रोः सेवा स्वसंस्कृतिः, तत्सेवायै वृद्धाश्रमे स्थापनं विकृतिः । पयःपानं स्वसंस्कृतिः, सुरापानं विकृतिः । विकृतीनां त्यागपूर्वकं स्वसंस्कृतेः परिपालनेन एव स्वसंस्कृतेः संरक्षणं सम्भवति ।

**सद्योजातः –** आम् । एवमेव नारीसम्मानं स्वसंस्कृतिः, तासाम् अवहेलनं विकृतिः । यतो हि, उक्तञ्च शास्त्रे–

**यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ।**
**यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः ॥**

तथैव जातीयव्यवस्था स्वसंस्कृतिः, जातीयविभेदश्च विकृतिः ।

**आर्या –** अहो ! बहु उत्तमं सद्योजात ! आवां गुरुकुलं समागमाव खलु । आवयोः संलापेन च वक्तृत्वकलायाः कथनसामग्री वर्धिता । धन्यवादः मित्र ! त्वं गत्वा श्रोतृपङ्क्तौ वस । अहं प्रतियोगिच्छात्राणां पङ्क्तौ गच्छामि ।

**सद्योजातः –** अस्तु आर्ये ! प्रतियोगितायाः सफलतायै शुभाशयाः ।

## शिक्षणालोकः

स्वसंस्कृत्यनुकूलं जीवनं यापयितुं छात्राः प्रेरणीयाः । स्वसंस्कृतिम् अनुसृत्य चलनं जीवने बहुलाभकरं भवतीति च ते बोधनीयाः ।

## अभ्यासः

### पाठानुशीलनम्

१. **एकवाक्येन उत्तरयत**

(क) के मित्रे स्तः ?

(ख) आर्या कुत्र पठति ?

(ग) किं निकटस्थम् अस्ति ?

(घ) कः मातुलगृहे स्थित्वा पठति ?

(ङ) सद्योजातः ह्यः कुत्र आगतवान् ?

(च) गुरुकुले कति विद्यालयानां सहभागिता भविष्यति ?

(छ) प्रातः आर्या कस्य गृहस्य मार्गेण क्वचित् गच्छन्ती भवति ?

(ज) केन छात्राणां वक्तृत्वकला-प्रतियोगिता आयोजिता वर्तते ?

२. **कथयितृनाम कोष्ठके लिखत**

(क) अहो ! उत्तमं तावत् । ( )

(ख) अयन्तु ममापि रुचिविषयः । ( )

(ग) आगच्छ तर्हि, सहैव गच्छाव । ( )

(घ) तद्वस्तुतः अस्माकं संस्कृतौ विकृतिः खलु । ( )

(ङ) अस्मिन् विषये त्वमपि किञ्चित् कथय नु । ( )

(च) वक्तृत्वकलायाः कृते सज्जता कथम् अस्ति ? ( )

(छ) तदनु कानिचित् सूत्राणि अहमपि कथयिष्यामि । ( )

(ज) अद्यतनः विषयः निर्धारितः अस्ति- 'स्वसंस्कृतेः संरक्षणम्' इति । ( )

३. **पाठं सस्वरं साभिनयञ्च पठत ।**

४. **पाठस्य प्रथमस्य पृष्ठस्य अनुलेखनं कुरुत ।**

५. **असत्यकथनं संशोध्य पुनर्लिखत**

(क) जनाः दीपान् प्रज्वाल्य विलम्बेन निर्वापयन्ति ।

(ख) केकनामकद्रव्य करतलवादनं स्वसंस्कृतिः ।

(ग) "मातृदेवो भव, पितृदेवो भव" इति अस्माकं संस्कृतेः सामान्यवचनानि ।

(घ) मातापित्रोः सेवा परसंस्कृतिः ।

(ङ) पयःपानं विकृतिः ।

(च) विकृतीनां त्यागपूर्वकं स्वसंस्कृतेः परिपालनं न करणीयम् ।

(छ) नारीसम्मानं परसंस्कृतिः ।

(ज) यत्र नार्यः पूज्यन्ते तत्र देवताः न रमन्ते ।

६. **अधस्तनानि पदानि प्रयुज्य नवीनानि वाक्यानि रचयत**

क्रियाः, तथैव, स्वसंस्कृतिः, विकृतिः, अहो, आवाम्, गुरुकुलम्, खलु, वक्तृत्वकला, धन्यवादः, वस, गच्छामि, सज्जता, सम्यक्, यथाज्ञानम्, कथय, मम कृते, साहाय्यम्, शुभाशयाः ।

७. **परस्परं मेलयत**

| **कर्ता** | **क्रिया** |
|---|---|
| त्वम् | कथयिष्यामि । |
| प्रतियोगिता | भविष्यति । |
| अहं | निर्वापयन्ति । |
| संरक्षणं | रमन्ते । |
| अहं | गच्छसि ? |
| साहाय्यं | वर्तते । |
| जनाः | शक्नोमि ? |
| देवताः | सम्भवति । |

८. **पाठस्य सन्देशं विचार्य सूत्रगतरुपेण प्रस्तुत ।**

९. **पदविच्छेदं कृत्वा शुद्धमुच्चारयत**

नार्यस्तु, जातीयविभेदश्च, वक्तृत्वकलायाः, कथनसामग्री, श्रोतृपङ्क्तौ, यत्रैतास्तु, सर्वास्तत्राफलाः ।

१०. **शिक्षकस्य साहाय्येन अद्यस्तनस्य पद्यस्य व्याख्यां कुरुत**

**यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ।**
**यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः ॥**

११. **अधस्तनं संवादं पठित्वा प्रश्नान् उत्तरयत**

**सहचालकः –** सर्वे यात्रिकाः ! कृपया यात्राशुल्कं यच्छन्तु ।

**एकः यात्रिकः –** त्रिपुरेश्वरात् गोशालापर्यन्तं कियत् शुल्कम् ?

**सहचालकः –** पञ्चविंशतिः रूप्यकाणि ।

**यात्रिकः –** स्वीकरोतु पञ्चविंशतिः रूप्यकाणि ।

**अन्यः यात्रिकः –** अरे सहचालक ! अयन्तु ज्येष्ठनागरिकः । कथं पञ्चविंशतिः रूप्यकाणि स्वीकरोति ?

**सहचालकः –** परिचयपत्रं न अदर्शयत् । स पूर्णं यात्राशुल्कं दातुम् इच्छति चेत् भवान् मध्ये किमर्थं वदति ?

**अन्यः यात्रिकः –** नहि नहि । तत्तु भवतः कर्तव्यं वर्तते । ज्येष्ठनागरिकाणां सम्मानः भवतः अपि कर्तव्यः अस्ति । आकृत्या एव स ज्येष्ठनागरिकः अनुभूयते । तत्र च अहं स्वयम् उत्थाय तम् आसन्दे समुपवेशयम् । भवान् एतत्सर्वं जानाति तथापि...

**सहचालकः –** क्षम्यतां क्षम्यताम् । इतःपरं मम अवधानं भविष्यति । (ज्येष्ठनागरिकं प्रति) हे मान्यवर्य ! एतानि दश रूप्यकाणि च स्वीकरोतु ।

(अ) **एकपदेन उत्तरयत**

(क) त्रिपुरेश्वरात् गोशालापर्यन्तं कियत् शुल्कम् ?

(ख) ज्येष्ठनागरिकः किं न अदर्शयत् ?

(आ) **एकवाक्येन उत्तरयत**

(क) कः मध्ये वदति ?

(ख) ज्येष्ठनागरिकाणां सम्मानः कस्य अपि कर्तव्यः ?

(ग) ज्येष्ठनागरिकः कया एव अनुभूयते ?

(घ) अन्यः यात्रिकः उत्थाय किम् अकरोत् ?

(इ) **संवादस्य आशयं विविच्य लिखत ।**

१२. **अधो लिखितयोः यथेच्छम् एकं पक्षमादाय सङ्क्षिप्तं संवादं रचयत**

(क) छात्र-ग्रन्थपालौ

(ख) भक्त-मालाकारौ

(ग) स्वामि-सेवकौ

## व्यवहारानुशीलनम्

१. स्वसंस्कृतेः गुणानां सूचीं निर्माय कक्षायां प्रदर्शयत ।

२. स्वस्य जन्मोत्सवदिवसे यूयं किं किं कुरुतेति योजनां कृत्वा शिक्षकं श्रावयत ।

३. युष्माकं ग्रामे नगरे वा संस्कृतौ के विकाराः दृश्यन्ते ? तेषां विकाराणाम् अपाकरणाय किं किं करणीयमिति कक्षायां परस्परं विमृशत ।

४. स्वसंस्कृतेः पालनं किमर्थम् आवश्यकमिति स्वकीयान् तर्कान् प्रस्तुत ।

## षष्ठः पाठः

# नारीसम्मानम्

**सृष्टेर्विधायिका नारी लोकवन्द्या जगन्मयी ।**

**भरते भुवने प्राणान् वात्सल्यममतादिभिः ॥**

**अन्वयः** सृष्टेर्विधायिका जगन्मयी लोकवन्द्या नारी वात्सल्यममतादिभिः भुवने प्राणान् भरते ।

**भावार्थः** नारी जगत् सृजति । जगन्मयी सा सर्वत्र जगति व्याप्ता अस्ति । स्नेहभावेन ममत्वभावेन च सा प्राणान् प्रदाय संसारं सजीवं कारयति । अतः सा वन्दनीया भवति ।

**सरलार्थः** नारी सर्वत्र जगत्मा व्याप्त छिन् । सृष्टिकर्ता पनि उनै हुन् । आफ्नो वात्सल्य र ममताले संसारलाई जीवित तुल्याउने नारी लोकमा वन्दनीय छिन् ।

**यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ।**

**यत्रैस्तास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः ॥**

**अन्वयः** यत्र तु नार्यः पूज्यन्ते तत्र देवताः रमन्ते । यत्र तु एताः न पूज्यन्ते तत्र सर्वाः क्रियाः अफलाः (भवन्ति)

**भावार्थः** यस्मिन् परिवारे, समाजे, देशे च नार्यः सम्मानिता भवन्ति तत्र देवताः ससुखं रमन्ते किन्तु यत्र नार्यः उपेक्षिताः पीडिता वा भवन्ति तत्र विहितानि निखिलान्यपि कर्माणि निष्फलानि भवन्ति ।

**सरलार्थः** जहाँ नारीको सम्मान हुन्छ त्यहाँ देवताहरू खुसी भएर बस्दछन् तर जहाँ नारीहरू तिरस्कृत हुन्छन् त्यहाँ गरिएका सम्पूर्ण कार्यहरू निरर्थक बन्दछन् ।

**शोचन्ति जामयो यत्र विनश्यत्याशु तत्कुलम् ।**

**न शोचन्ति तु यत्रैता वर्धते तद्धि सर्वदा ॥**

**अन्वयः** यत्र जामयः शोचन्ति तत् कुलम् आशु विनश्यति । यत्र तु एताः न शोचन्ति तत् हि सर्वदा वर्धते ।

**भावार्थः** यस्मिन् परिवारे नार्यः शोकसन्तप्ता भवन्ति चेत् तादृशस्य कुलस्य यथाशीघ्रं विनाशो भवति किन्तु यस्मिन् परिवारे नार्यः सम्मानिताः प्रसन्नाश्च सन्ति तादृशस्य कुलस्य सर्वदा समुन्नतिरेव भवति ।

**सरलार्थः** जुन परिवारमा नारीहरू शोकसन्तप्त बनेका हुन्छन् त्यो कुलको शीघ्र विनाश हुन्छ तर जुन कुलमा नारीहरू हाँसीखुसी सम्मानित भई बसेका हुन्छन्, निश्चय नै त्यस कुलको सधैँ उन्नति हुन्छ ।

**तस्मादेताः सदा पूज्या भूषणाच्छादनाशनैः ।**
**भूतिकामैर्नरैर्नित्यं सत्कारेषूत्सवेषु च ॥**

**अन्वयः** तस्माद् भूतिकामैः नरैः एताः (जामयः) नित्यं सत्कारेषु उत्सवेषु च भूषणात् आच्छादनाशनैः सदा पूज्याः ।

**भावार्थः** ये जनाः स्वसमुन्नतिं कामयन्ते तैः सांस्कारिकेषु कर्मसु पर्वोत्सवाद्यवसरेषु च अलङ्कारवस्त्रमिष्टान्नानि प्रदाय स्वकुलस्थनारीणां सम्मानं विधातव्यम् ।

**सरलार्थः** आफ्नो उन्नति तथा ऐश्वर्य चाहने मानिसले विभिन्न सांस्कारिक तथा उत्सवका कार्यहरूमा गरगहना, राम्रा लत्ताकपडा तथा मिठा मिठा भोजनहरू दिएर परिवारका नारीहरूलाई आदरसम्मान गर्नुपर्छ ।

**पूजनीया महाभागाः पुण्याश्च गृहदीप्तयः ।**
**स्त्रियः श्रियो गृहस्योक्ताः तस्माद्रक्ष्या विशेषतः ॥**

**अन्वयः** महाभागाः पुण्याः गृहदीप्तयः गृहस्य श्रियः च स्त्रियः पूजनीयाः । तस्मात् (एताः) विशेषतः रक्ष्याः (भवन्ति) ।

**भावार्थः** नार्यः भाग्यशालिन्यः पुण्यशीलाश्च भवन्ति । एताः गृहशोभा तथा गृहलक्ष्म्यश्च मन्यन्ते । अतः सर्वपूज्यानामेतासां नारीणां सुरक्षा विशेषरूपेण कर्तव्या ।

**सरलार्थः** नारीहरू महाभाग्याशाली तथा पुण्यशाली हुन् । उनीहरू घरको ज्योति (शोभा) तथा साक्षात् लक्ष्मी भएकाले पूज्य छन् । त्यसैले नारीहरूको विशेष सुरक्षा गर्नुपर्छ ।

## अभ्यासः

### पाठानुशीलनम्

१. **शुद्धम् उच्चारयत**

वात्सल्यममतादिभिः, यत्रैतास्तु, विनशत्याशु, भूषणाच्छादनाशनैः, भूतिकामैः, गृहदीप्तयः

२. **पाठस्थानां श्लोकानां सस्वरवाचनं कुरुत ।**

३. **पाठस्थमन्तिमं श्लोकं शिक्षकमुखात् श्रुत्वा लिखत ।**

४. **सङ्क्षेपेण उत्तरयत**

(क) नारी कथं भुवने प्राणान् भरति ?

(ख) कुत्र क्रियाः निष्फलाः भवन्ति ?

(ग) कीदृशं कुलम् आशु विनश्यति ?

(घ) नारीणां सम्मानाय कानि कानि वस्तूनि दातव्यानि ?

(ङ) नारीणां रक्षा किमर्थं कर्तव्या ?

५. **श्लोकांशान् परस्परं मेलयत**

| | |
|---|---|
| यत्र नार्यस्तु पूज्यन्ते | पुण्याश्च गृहदीप्तयः । |
| पूजनीया महाभागाः | भूषणाच्छादनाशनैः । |
| तस्मादेताः सदा पूज्याः | वात्सल्यममतादिभिः । |
| न शोचन्ति तु यत्रैताः | रमन्ते तत्र देवताः । |
| | वर्धते तद्धि सर्वदा । |

६. **अधस्तनानि पदानि प्रयुज्य वाक्यानि रचयत**

व्याप्ता, देवताः, जामयः, पूज्याः, नित्यम्, स्त्रियः, विशेषतः, विनश्यति

७. **अधः प्रस्तुतां लघुकथां पठित्वा प्रश्नान् उत्तरयत**

नगरस्य निकटे एकः महान् वृक्षः आसीत् । तस्य वृक्षस्य शाखायां नीडं निर्माय एकः चतुरः काकः वसति स्म । तस्यैव वृक्षस्य कोटरे एकः सर्पः अपि वसति स्म । सर्पः एकाकी आसीत् चेद् नीडे काकस्य शिशवः अपि आसन् ।

एकदा काकः आहारार्थं बहिः अगच्छत् । तदा बुभुक्षितः सर्पः नीडम् आगच्छत् । सः

काकस्य सर्वान् शिशून् अखादत् । आहारं गृहीत्वा काकः वृक्षम् आगत्य स्वनीडम् अपश्यत् । तत्र शिशवः न आसन् । स स्वशिशून् न दृष्टवान् । सः भृशं दुःखितः अभवत् । सर्पस्य एतत् दुष्कृत्यं काकः सम्यग् ज्ञातवान् ।

तस्य वृक्षस्य समीपे एकः तडागः आसीत् । एकदा तत्र राजकुमारी स्नानाय आगच्छत् । स्नानात् पूर्वं सा स्वस्य सुवर्णालङ्कारं तडागाद् बहिरेव स्थापितवती । एतत् सर्वं काकः दूराद् अपश्यत् । सः झटिति आकाशमार्गेण आगत्य सुवर्णस्य अलङ्कारम् अगृह्णात् । स उड्डीय स्वस्य वृक्षम् आगच्छत् । राजपुरुषाः काकम् अन्वगच्छन् । काकः सुवर्णालङ्कारं सर्पस्थे कोटरे न्यपातयत् । राजपुरुषाः कोटरे सर्पम् अपश्यन् । ततः तं मारयित्वा अलङ्कारं च गृहीत्वा प्रत्यागच्छन् । सर्पं मृतं दृष्ट्वा काकः प्रसन्नः अभवत् ।

(अ) **एकपदेन उत्तरयत**

(क) आहारार्थं काकः कुत्र अगच्छत् ?

(ख) कः काकस्य सर्वान् शिशून् अखादत् ?

(आ) **पूर्णवाक्येन उत्तरयत**

(क) काकः कुत्र वसति स्म ?

(ख) राजपुरुषाः वृक्षकोटरे किम् अपश्यन् ?

८. **उचितपदेन रिक्तस्थानं पूरयत**

| | | | | |
|---|---|---|---|---|
| **परिवारस्य** | **जगत्** | **भाग्यशालिन्यः** | **सम्मानं** | **देवताः** |

(क) स्नेहभावेन नारी ............... सजीवं कारयति ।

(ख) यत्र नार्यः पूज्यन्ते तत्र ................ रमन्ते ।

(ग) नार्यः सम्मानिताः सन्ति चेत् ............ समुन्नतिः भवति ।

(घ) वस्त्रालङ्कारादिभिः नारीणां ................... कर्तव्यम् ।

(ङ) नार्यः ............ पुण्यशीलाश्च भवन्ति ।

९. **अधस्तनं श्लोकं दृष्ट्वा विद्यार्थिनां स्वभावविषये एकम् अनुच्छेदं लिखत**

मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम् ।
मनस्यन्यद् वचस्यन्यत् कर्मण्यन्यद् दुरात्मनाम् ॥

१०. **नारीणां सुरक्षायाः सम्मानस्य च विषये पाठस्थपद्यानि आधारीकृत्य अनुच्छेदमेकं लिखत ।**

११. **सरलार्थं विलिख्य कक्षायां श्रावयत**

विद्या मित्रं प्रवासेषु भार्या मित्रं गृहेषु च ।
व्याधितस्यौषधं मित्रं धर्मो मित्रं मृतस्य च ॥

१२. **श्लोकं पठित्वा प्रश्नान् उत्तरयत**

**नाऽन्नोदकसमं दानं न तिथिर्द्वादशीसमा ।**
**न गायत्र्याः परो मन्त्रो न मातुः परदैवतम् ॥**

(क) सर्वोत्कृष्टं दानं किम् अस्ति ?

(ख) उत्तमा तिथिः का उच्यते ?

(ग) सर्वश्रेष्ठः मन्त्रः कः ?

(घ) का परदेवता उच्यते ?

१३. **अधस्तनानि पदानि प्रयुज्य चित्रवर्णनं कुरुत**

मार्गस्य, मन्दिरे, याचकः, जीर्णम्, खाद्यान्नम्, प्राङ्गणे, दण्डम्, बालकः, साहाय्यम्







## व्यवहारानुशीलनम्

१. नार्यः प्रसन्नाः न सन्ति चेत् परिवारे शान्तिः समृद्धिश्च नभवति ? कथम्। स्वमतं प्रकटीकुरुत ।

२. कीदृशैः कर्मभिः नारीणां वास्तविकं सम्मानं भवति ? मित्रैः सह विमर्शं विधाय लिखत ।

३. प्रदत्तानां प्रश्नानां सर्वसमुचिते उत्तरे 'आम्' इति बोधकं चिह्नं (√) दत्त

(क) नारी का मन्यते ?

(अ) जनसामान्या (आ) संहारकारिणी (इ) सृष्टिरूपा

(ख) नारीणां विशेषता का अस्ति ?

(अ) वात्सल्यम् (आ) कारुण्यम् (इ) दैन्यम्

(ग) नारीणां प्रसन्नता कस्य हेतुः वर्तते ?

(अ) विनाशस्य (आ) समृद्धेः (इ) धनलाभस्य

(घ) नार्यः गृहस्य ......... उच्यन्ते ।

(अ) प्राणाः (आ) स्वामिन्यः (इ) श्रियः

## सप्तमः पाठः

# दानमहिमा

उपकारस्य भावनया कस्मैचन दीयमानं वस्तु दानं कथ्यते। वस्तूनि स्वाधिकारस्य परित्यागं विधाय परेषाम् अधिकारस्थापनं दानकर्मणि भवति। न्यायोपार्जितम् अन्नधनादिकं यथाशक्ति सत्पात्रेभ्यः प्रदानं दानपदेनाभिधीयते। दानरूपेण प्रदत्तं दानीयं वस्तु ग्राहकस्य कृते उपयोगि भवेदिति विचारणीयम्। दानरूपेण प्राप्तं वस्त्रं परिधाय निर्वस्त्राः शीतकालं यापयन्ति। दाने प्राप्तेन धनेन निर्धनाः सन्ततीः पाठयन्ति। रुग्णाश्च स्वास्थ्योपचारं कुर्वन्ति। दानं हितभावनया विधीयते। अतः दानं प्रशंसनीयं दातारश्च प्रशंसनीयाः भवन्ति। याचकाः कालक्रमे म्रियन्ते परन्तु दातारः अमरत्वं प्राप्नुवन्ति। परशुः दारुकमिव दानं पापं छिनत्ति। दानं दातुः दुःखम् अपाकृत्य सुखं प्रददाति। दानेनैव शत्रवः अपि मित्राणि जायन्ते। धनस्य उत्तमा गतिः दानम् एव अस्ति। वस्तुतः दानं मानवसेवायाः सरलम् उत्तमं च साधनं मन्यते।

करुणावान् त्यागी सदाचारी मनुष्यः एव दाता भवितुं शक्नोति। लुब्धः मनुष्यः परहिताय स्ववस्तूनि दातुं न शक्नोति। दाता परजनानां समुन्नतिम् इच्छति। अतः स याचकेभ्यः समाजाय वा स्वधनानि, ज्ञानानि, कलाशिल्पादिकञ्च प्रयच्छति। उत्तमः दाता दानं विधाय सामाजिकप्रतिष्ठां न कामयते। दानानन्तरं समाजे मम प्रशंसा भवेत् इति अपि स न इच्छति। एतादृशाणां महत्तमानां जनानां दानस्य प्रयोजनं लोककल्याणमेव भवति। महर्षिः दधीचिः महापराक्रमी कर्णः राजा हरिश्चन्द्रश्च एतादृशाः एव प्रसिद्धाः दानवीराः आसन्। एते दानकर्मणा अमरतां प्राप्नुवन्। अतः एतेषां नाम अद्यापि सश्रद्धं स्मर्यते।

मनुष्यः विवेकी सर्वोत्तमः प्राणी वर्तते। अतः दीनानाम् आर्तानां च मनुष्याणां साहाय्यं स एव कर्तुं शक्नोति। दानशीलता मनुष्याणां स्वाभाविकी विशेषता वर्तते। प्रकृतिः अपि अस्मान् शिक्षयति 'दानशीलो भव' इति। वृक्षाः स्वफलानि परेभ्यः यच्छन्ति। नदी परोपकारायैव परेभ्यः जलं ददाति। अस्माकं शरीरम् अपि परोपकाराय एव। देशस्य जनतायाश्च उपकारार्थं वीराः

बलिदानं कुर्वन्ति । महाराजः शिविः कपोतस्य प्राणान् रक्षयितुं व्याधाय स्वदेहम् समार्पयत् । इयमेव दानिनां महत्ता । ते स्वार्थं न पश्यन्ति; परोपकारम् एव पश्यन्ति । तदर्थं सर्वस्वदानं कुर्वन्ति ।

दानिनः आत्मवत् सर्वभूतानि पश्यन्ति । परेषां दुःखानि ते स्वदुःखमिव अनुभवन्ति । अतः दुःखिनां दुःखनिवारणाय ते दानाय समर्थाः भवन्ति । परेषां वेदनां विलोक्य एते स्वयं व्यथिताः भवन्ति । एतादृशाः जनाः सहृदयिनः उच्यन्ते । द्रव्यलुब्धाः जनाः धनेषु सुखम् अन्विषन्ति परन्तु दानिनः परसुखेषु आत्मसुखम् अनुभवन्ति । सङ्ग्रहिणः धनवन्तः अपि सदा दुःखिनः प्रतीयन्ते । दानं विधाय निर्धनाः सन्तः अपि दानिनस्तु सदा सुखिनः भवन्ति । ते समाजे सर्वोपरि विराजन्ते । अतः गुरुजनाः कथयन्ति -

**सङ्ग्रहैकपरः प्राप समुद्रोऽपि रसातलम् ।**
**दाता तु जलदः पश्य भुवनोपरि गर्जति ॥**

दानं हि परमो धर्मः इति श्रुत्वापि सर्वे जना दातारः भवितुं न शक्नुवन्ति । अतः शास्त्राणि कथयन्ति, 'दाता दशसहस्रेषु' । अर्थात् दशसहस्रेषु कोऽपि एक दाता भवति । दानं विधाय



दाताः शान्तिम् अनुभवति । धर्मम् उपार्जयति । असुरेश्वरः महाराजः बलिः वामनाय दानरूपेण लोकत्रयं प्रदाय स्वयं तु सुतलम् अगच्छत् तथापि स सुखी शान्तश्च आसीत् । मनुष्यः दानाय समर्थः अस्ति । कदाचित् देवता दातुं न शक्नोति परन्तु मनुष्यः सर्वं दातुं शक्नोति । महामुनिः दधीचिः देवराजाय देवकार्यं साधयितुं स्वस्य अस्थीनि दानरूपेण अददात् । अतः दानं मनुष्याणां कर्तव्येषु एकं महत्तमं कार्यम् अस्ति । दानम् अक्षयं भवति । अत एव उच्यते, 'दानेन तुल्यो निधिरस्ति नान्यः ।'

असहयोगी मनुष्यः यज्ञं जपं तपः योगादिकं च कर्म कुर्वन् अपि सुखी न भवति । दानस्य भावना मनुष्ये समाजे च नास्ति चेत् सः मनुष्यः समाजो वा सभ्यः न कथ्यते । तादृशस्य समाजस्य मनुष्यस्य च पतनमेव भवति । सामाजिकाः सदस्याः मिथः सहायतां कामयन्ते । विपद्ग्रस्ताः मनुष्याः समाजात् सहयोगस्य अपेक्षां कुर्वन्ति । अतः समाजस्य सामाजिकसदस्यानां च समुन्नतये दानरूपस्य सहयोगस्य आवश्यकता भवति ।

आवश्यकतानुसारेण विभिन्नानि वस्तूनि दानरूपेण दीयन्ते । केचन दानिनः श्रद्धया दानं कुर्वन्ति । केचन तु दयया दानं ददति । विद्वज्जनेभ्यः सामाजिकसंस्थाभ्यः प्रतिभाशालिभ्यश्च श्रद्धया दानं दीयते । आर्तेभ्यः दीनेभ्यः याचकेभ्यश्च दयावशात् वस्त्रान्नधनादीनि दीयन्ते । श्रद्धया दत्तं दानं सर्वोत्तमं महत्त्वपूर्णं सफलं च मन्यते । श्रद्धाविरहितं दानं निष्फलं च भवति । अतः उपनिषत् कथयति, 'श्रद्धया देयम्' इति । मत्स्यान् मारयितुं जनाः पूर्वं तेभ्यः मांसखण्डं प्रयच्छन्ति । तादृशेन निकृष्टदानेन दातुः ग्राहकस्य च हितं न भवति । अतः तद् दानं न कथ्यते । तत्तु निकृष्टं कर्म एव अस्ति । दानं तु मनुष्याणां महत्तमं पावनं कर्म अस्ति । अस्माभिः अपिं लोककल्याणार्थं दानाय प्रयतनीयम् ।

## अभ्यासः

### पाठानुशीलनम्

१. **पाठस्य प्रथमद्वितीयौ अनुच्छेदौ सस्वरं वाचयत ।**

२. **शुद्धम् उच्चारयत**

न्यायोपार्जितम्, सामाजिकप्रतिष्ठाम्, रुग्णाः, सङ्ग्रहिणः, असुरेश्वरः, दशसहस्रेषु, कलाशिल्पादीन्, स्वास्थ्योपचारम्, विपद्ग्रस्ताः, वस्त्रान्नधनादीनि

३. **प्रदत्तानां प्रश्नानां सर्वसमुचिते उत्तरे 'आम्' इति बोधकं चिह्नं (√) दत्त**

(क) कीदृश्या भावनया दानं दीयते ?

(अ) वैरभावनया (आ) ममत्वभावनया (इ) उपकारस्य भावनया

(ख) कस्य नाम सश्रद्धं स्मर्यते ?

(अ) धनिनाम् (आ) दानिनाम् (इ) याचकानाम्

(ग) अस्माकं शरीरं कस्मै प्रयोजनाय अस्ति ?

(अ) परोपकाराय (आ) विषयभोगाय (इ) धनार्जनाय

(घ) दानिनः सर्वभूतानि कथं पश्यन्ति ?

(अ) देववत् (आ) आत्मवत् (इ) मित्रवत्

(ङ) महाराजः बलिः कस्मै लोकत्रयं प्राददात् ?

(अ) वामनाय (आ) देवराजाय (इ) स्वपुत्राय

४. **उत्तराणि लिखत**

(क) दानकर्मणि किं भवति ?

(ख) दानं कीदृशं साधनम् अस्ति ?

(ग) रुग्णाः दाने धनं प्राप्य किं कुर्वन्ति ?

(घ) कः दानं कर्तुम् असमर्थः वर्तते ?

(ङ) प्रसिद्धा दानवीराः के के आसन् ?

(च) महाराजः शिविः किम् अकारोत् ?

(छ) लुब्धदानिनोः मध्ये को भेदः ?

(ज) कीदृशः मनुष्यः असभ्यः उच्यते ?

(झ) विपद्ग्रस्ताः जनाः किं कुर्वन्ति ?

(ञ) दयावशात् केभ्यः दानं दीयते ?

(ट) निकृष्टदानेन कस्य कस्य हितं न भवति ?

५. **अधस्तनं श्लोकं पठित्वा शिक्षकस्य सहयोगेन अभिवादनस्य महत्त्वं वर्णयत**

रविश्चन्द्रो घना वृक्षा नदी गावश्च सज्जनाः ।
एते परोपकाराय युगे दैवेन निर्मिताः ॥

६. **समुचितम् अर्थं विचार्य परस्परं योजयत**

| | |
|---|---|
| दाता | धनसङ्ग्रहः कर्तव्यः । |
| मनुष्यः | दानाय प्रयतनीयम् । |
| दधीचिः | अमरत्वं प्राप्नोति । |
| लोककल्याणार्थम् | अस्थिदानम् अकरोत् । |
| | विवेकी प्राणी अस्ति । |

७. **अधस्तनं वाक्यं शुद्धं कृत्वा उत्तरपुस्तिकायां लिखत**

दिनानाम् आर्तानां च मनुष्यानां सहाय्यं स एव कर्तुं सक्नोति । दानशिलता मनुष्याणां स्वाभाविकः विशेसता बर्तते ।

८. **अधस्तनपदानि प्रयुज्य अनुशासनस्य विषये एकम् अनुच्छेदं रचयत**

सर्वपूज्या, मातुः, देवरूपिण्याः, मातृभक्तिम्, सहयोगिनी, आदरणीयेषु, पालनम्, अनाथः, वात्सल्यम्, गरीयसी, कुमाता

९. **दानं हि परमो धर्मः इति विषये स्वविचारं कक्षायां श्रावयत ।**

१०. **अधस्तनं गद्यांशं पठित्वा प्रदत्तान् प्रश्नान् उत्तरयत**

रामायणं संस्कृतभाषायां लिखितः प्राचीनतमः ग्रन्थः अस्ति । अत्र सप्तकाण्डाः सन्ति । एतस्य रचनाकारः महामुनिः वाल्मीकिः अस्ति । अस्य वास्तविकं नाम रत्नाकरः

आसीत् । असौ कदाचित् जनान् वञ्चयित्वा जीविकां करोति स्म । असौ देवर्षेः नारदाद् उपदेशं प्राप्य भीषणं तपः अकरोत् । तपसः काले एतस्य शरीरं वल्मीकैः प्रच्छन्नम् अभवत् । अतः तपसा ज्ञानं लब्ध्वा रत्नाकरः वाल्मीकिः इति नाम्ना प्रसिद्धः अभवत् । वाल्मीकिरचितं रामायणं विश्वसाहित्यस्य सर्वाधिकं प्राचीनं महाकाव्यं मन्यते । रामायणे मुख्यतः भ्रातृप्रेमः, स्त्रीजनेषु कृतस्य अपमानस्य परिणामः, रामरावणयोः महासङ्ग्रामः इत्यादिविषयाः वर्णिताः सन्तिः । इह पौटस्त्यसभ्यतायाः स्वरूपं सविस्तरं प्रदर्शितम् अस्ति । रामायणम् अस्माकं ज्ञानस्य विज्ञानस्य च आदिमं स्रोतः मन्यते । संस्कृतसाहित्यस्य इदं प्रथमं काव्यरत्नम् अस्ति । अतः वाल्मीकिः संस्कृतभाषायाः आदिकविः उच्यते ।

**प्रश्नाः**

(क) रामायणः कीदृशः ग्रन्थः अस्ति ?

(ख) वाल्मीकेः वास्तविकं नाम किम् आसीत् ?

(ग) रत्नाकरः जीविकायै किं करोति स्म ?

(घ) रत्नाकरं कः उपादिशत् ?

(ङ) रत्नाकरः कथं वाल्मीकिः इति नाम्ना प्रसिद्धः ?

(च) रामायणस्य मुख्याः विषयाः के सन्ति ?

११. **श्लोकयोः सरलार्थाधारेण क्रियाकलापान् कुरुत**

आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः ।
नास्त्युद्यमसमो बन्धुः यं कृत्वा नावसीदति ॥
उद्यमेन हि सिद्ध्यन्ति कार्याणि न मनोरथैः ।
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ॥

**सरलार्थः**

आलस्यं शरीरे एव वसति । तद् मनुष्यस्य महान् रिपुः अस्ति । मनुष्यस्य बन्धुः (मित्रं) तु उद्यमः अस्ति । यतो हि उद्यमं कृत्वा जनः सुखी प्रशन्नश्च भवति । उद्यमं कुर्वाणः मनुष्यः कदापि दुःखी न भवति । इदं कर्म करोमि इति इच्छामात्रेण कार्याणि पूर्णानि न भवन्ति । उद्यमं विधाय एव कार्याणि साधयितुं शक्यन्ते । यथा सिंहः सुप्तः अस्ति चेत् तस्य मुखे मृगाः स्वयम् आगत्य न प्रविशन्ति । मृगान् खादयितुं तेन अपि उद्यमः एव कर्तव्यः भवति । अतः वयमपि आलस्यं परित्यज्य स्वकार्यस्य सिद्धये उद्यमं कुर्मः ।

**(क) एकपदेन उत्तरयत**

(अ) आलस्यं कुत्र वसति ?

(आ) मनुष्यस्य बन्धुः कः अस्ति ?

(इ) मृगान् खादितुं सिंहेन किं कर्तव्यम् ?

**(ख) पूर्णवाक्येन उत्तरयत**

(अ) मनुष्यस्य महान् रिपुः कः अस्ति ?

(आ) जनः कथं सुखी भवति ?

(इ) कीदृशेन इच्छामात्रेण कार्याणि न सिध्यन्ति ?

(ई) वयं किमर्थम् उद्यमं कुर्मः ?

**(ग) प्रदत्तपदानां विपरीतार्थबोधकं पदं विलिख्य वाक्येषु योजयत**

सुप्तः, करोमि, सुखी, स्वकार्यम्, कदा, पूर्णानि

**(घ) कोष्ठके उचितम् (√) अनुचितं (×) वा चिह्नं निर्दिशत**

(क) उद्यमः मनुष्यस्य रिपुः अस्ति । ( )

(ख) उद्यमशीलाः जनाः दुःखिनः न भवन्ति । ( )

(ग) कार्यसाधकं साधनम् उद्यमः अस्ति । ( )

(घ) सुप्तः सिंहः उद्यमी उच्यते । ( )

(ङ) अस्माभिः यदा कदा एव उद्यमः कर्तव्यः । ( )

१२. **समुचितपदेन रिक्तस्थानं पूरयत**

(क) दानं ............ दीयते । (सर्वेभ्यः, सत्पात्रेभ्यः, दुर्जनेभ्यः)

(ख) सर्वे जनाः ............. भवितुं न शक्नुवन्ति । (दातारः, भोक्तारः, द्रष्टारः)

(ग) मनुष्याणां ........... कर्म दानम् अस्ति । (निन्दनीयम्, वर्णनीयम्, महत्तमम्)

(घ) बलिः ............. अकरोत् । (अस्थिदानम्, अन्नदानम्, त्रिलोकदानम्)

(ङ) .................... दानं निष्फलं भवति । (त्यागविरहितम्, श्रद्धाविरहितम्, धनविरहितम्)

१३. **अधस्तनं श्लोकं दृष्ट्वा विदुषां मूर्खाणां च भिन्नताविषये एकम् अनुच्छेदं लिखत**

**काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् ।**
**व्यसनेन च मूर्खाणां निद्रया कलहेन वा ॥**

१४. **सरलार्थं विलिख्य कक्षायां श्रावयत**

**प्रदोषे दीपकः चन्द्रः प्रभाते दीपकः रविः ।**
**त्रैलोक्ये दीपकः धर्मः सुपुत्रः कुलदीपकः ॥**

१५. **श्लोकं पठित्वा प्रश्नान् उत्तरयत**

**सेवितव्यो महावृक्षः फलच्छायासमन्वितः ।**
**यदि दैवात् फलं नास्ति छाया केन निवार्यते ॥**

(क) कः सेवितव्यः ?

(ख) महावृक्षात् किं किं लभ्यते ?

(ग) फलहीनाद् वृक्षात् किं प्राप्यते ?

(घ) वृक्षस्य फलं कः हर्तुं शक्नोति ?

## व्यवहारानुशीलनम्

१. त्वया कदाचित् कस्मैचित् दानं कृतमस्ति ? यदि अस्ति चेत् दानानन्तरं कीदृशी अनुभूतिः कृता ? स्वानुभूतेः सूचीं प्रदर्शयत ।

२. तव स्वकीये समाजे लोकहिताय दानं कुर्वन्तः जनाः सन्ति ? सन्ति चेत् केनचिद् एकेन कृतस्य दानस्य विषये वर्णनं कुरुत ।

३. निर्धनः अपि दाता भवितुं शक्नोति इति उच्यते । एतत् कथनं सत्यम् अपि अस्ति । तर्हि स कीदृशाणां वस्तुनां दानं कर्तुं शक्नोति ? तार्किकम् उत्तरं लिखत ।

अष्टमः पाठः

# मधुरभाषणम्

सत्यं ब्रूयात् प्रियं ब्रूयान्न ब्रूयात् सत्यमप्रियम् ।
प्रियं च नानृतं ब्रूयादेष धर्मः सनातनः ॥

वाणी रसवती यस्य यस्य श्रमवती क्रिया ।
लक्ष्मीः दानवती यस्य सफलं तस्य जीवितम् ॥

केयूराणि न भूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वला
न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः ।
वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते
क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम् ॥

कटु क्वणन्तो मलदायकाः खलाः, तुदन्त्यलं बन्धनशृङ्खला इव ।
मनस्तु साधुध्वनिभिः पदे पदे, हरन्ति सन्तो मणिनूपुरा इव ॥

**प्रथमं पद्यम्**

**पदच्छेदः –** सत्यम् ब्रूयात् प्रियम् ब्रूयात् न ब्रूयात् सत्यम् अप्रियम् प्रियम् च न अनृतम् ब्रूयात् एषः धर्मः सनातनः ।

**अन्वयः –** सत्यं ब्रूयात्, प्रियं ब्रूयात्, सत्यम् अप्रियं न ब्रूयात्, प्रियं च अनृतं न ब्रूयात्, एषः सनातनः धर्मः (अस्ति) ।

**सरलार्थः –** जनः सदा सत्यं ब्रूयात् (वदेत्) । प्रियं च वदेत् । सत्यम् अस्ति इति विचार्य अप्रियं न वदेत् । प्रियम् अस्ति इति विचार्य अनृतम् (असत्यं) अपि न वदेत् । यत् सत्यं प्रियं च उभयम् अस्ति तद् एव वदेत्, अयमेव सनातनः धर्मः अस्ति ।

**भाषार्थः –** सत्य बोलोस्, प्रिय बोलोस्, सत्य छ भन्दैमा अप्रिय नबोलोस्, प्रिय छ भन्दैमा असत्य पनि नबोलोस्, यही नै अनादिदेखि चलिआएको धर्म हो ।

## द्वितीयं पद्यम्

**पदच्छेदः –** वाणी रसवती यस्य यस्य श्रमवती क्रिया लक्ष्मीः दानवती यस्य सफलम् तस्य जीवितम् ।

**अन्वयः –** यस्य वाणी रसवती, यस्य क्रिया श्रमवती, यस्य लक्ष्मीः दानवती, तस्य जीवितं सफलम् (अस्ति) ।

**सरलार्थः –** यस्य वाण्यां रसः अस्ति, अथवा यः मधुरं भाषते, यः च श्रमपूर्वकं कार्यं करोति, दुःखिनां सहयोगाय धनस्य दानं च करोति तस्य जीवनं सफलं भवति ।

**भाषार्थः –** जसको बोली रसिलो छ, जो परिश्रमपूर्वक कर्म गर्दछ, जो आफ्नो सम्पत्तिले अरूलाई सहयोग गर्छ, त्यसको जीवन नै सफल हुन्छ ।

## तृतीयं पद्यम्

**पदच्छेदः –** केयूराणि न भूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वला न स्नानम् न विलेपनम् न कुसुमम् न अलङ्कृता मूर्धजाः वाणी एका समलङ्करोति पुरुषम् या संस्कृता धार्यते क्षीयन्ते खलु भूषणानि सततम् वाग्भूषणम् भूषणम् ।

**अन्वयः –** केयूराणि पुरुषं न भूषयन्ति । चन्द्रोज्ज्वला हारा न (भूषयन्ति) । स्नानम् न (भूषयति) । विलेपनम् न (भूषयति) । कुसुमम् न (भूषयति) । अलङ्कृताः मूर्धजाः

न (भूषयन्ति)। या संस्कृता धार्यते (सा) एका वाणी पुरुषं समलङ्करोति। (अन्यानि) भूषणानि क्षीयन्ते, वाग्भूषणं सततं भूषणम् (अस्ति)।

**सरलार्थः –** मनुष्यः केयूरेण भूषितो न भवति। हारेण, स्नानेन, स्नानेन, विलेपनेन, कुसुमैः वा भूषितो न भवति। यस्य वाणी मधुरा सुसंस्कृता शुद्धा च अस्ति, मनुष्यः तया वाण्या भूषितो भवति। अन्यानि केयूरादीनि भूषणानि नश्यन्ति। किन्तु वाग्भूषणं कदापि न नश्यति। अतः मनुष्यस्य वास्तविकं भूषणं मधुरवाणी अस्ति।

**भाषार्थः –** केयूर (?) लगाएर मान्छेको शोभा बढ्दैन। हार लगाएर, नुहाइधुवाइ गरेर, अनेक कुराको लेप लगाएर, फूल लगाएर पनि मान्छे राम्रो हुँदैन। जसको बोली मिठो छ, शुद्ध र सभ्य छ, त्यसले नै मान्छेको शोभा बढ्छ। अरु सबै गहनाहरू नष्ट भएर जान्छन्, तर वाणी यस्तो गहना हो जो कहिल्यै पनि नष्ट हुँदैन। त्यसैले मान्छेको असली गहना मिठो बोली नै हो।

## चतुर्थं पद्यम्

**पदच्छेदः –** कटु क्वणन्तः मलदायकाः खलाः तुदन्ति अलम् बन्धनशृङ्खला इव। मनः तु साधुध्वनिभिः पदे पदे हरन्ति सन्तः मणिनूपुरा इव।

**अन्वयः –** बन्धनशृङ्खलाः इव कटु क्वणन्तः मलदायकाः खलाः मनः अलं तुदन्ति। मणिनूपुरा इव सन्तः तु साधुध्वनिभिः पदे पदे मनः हरन्ति।

**सरलार्थः –** खलाः बन्धनशृङ्खलाः इव भवन्ति। तेषां वाणी कठोरा भवति। तेषां कठोरया वाण्या सर्वेषां मनः खिद्यति। साधवः मणिनूपुरा इव भवन्ति। तेषां वाणी मधुरा भवति। ते मधुरया वाण्या सर्वेषां मनः हरन्ति। कठोरा वाणी खलानां लक्षणम् अस्ति। मधुरा च वाणी साधूनां लक्षणम् अस्ति। अतः सदा मधुरं वक्तव्यम्।

**भाषार्थः –** दुर्जनहरू हात्ती, घोडा आदिलाई बाँध्ने साङ्लोजस्ता हुन्छन्। तिनीहरूको बोली पनि कठोर हुन्छ। त्यो सुनेर सबैको मन खिन्न हुन्छ। तर सज्जनहरू मणिको पाउजुजस्ता हुन्छन्। उनीहरूको वाणी पनि मिठो हुन्छ। आफ्नो मिठो बोलीले सज्जनहरूले सबैको मन लोभ्याउँछन्।

**अभ्यासः**

## पाठानुशीलनम्

१. **पाठस्थानां पद्यानां शुद्धतया वाचनं कुरुत ।**

२. **मित्रस्य मुखेन् श्रुत्वा पाठस्य चतुर्थं श्लोकं लिखत ।**

३. **सङ्क्षेपेण उत्तरयत**

(क) जनः कीदृशं ब्रूयात् ?

(ख) सफलस्य मनुष्यस्य वाणी कीदृशी भवति ?

(ग) कानि कानि वस्तूनि पुरुषं न भूषयन्ति ?

(घ) कीदृशी वाणी जनं समलङ्करोति ?

(ङ) जनस्य वास्तविकं भूषणं किम् अस्ति ?

(च) खलाः कीदृशाः भवन्ति ?

(छ) सन्तः किं कुर्वन्ति

४. **अधस्तनानि कथनानि समीचीनानि कृत्वा पुस्तिकायां लिखत**

(क) जनः असत्यम् अप्रियं च ब्रूयात् ।

(ख) यस्य वाणी रसवती अस्ति, सः सफलो न भवति ।

(ग) चन्द्रोज्ज्वलाः हाराः सर्वदा पुरुषं भूषयन्ति ।

(घ) अन्यानि भूषणानि पुरुषं भूषयन्ति, वाग्भूषणं तु शीघ्रं विनश्यति ।

(ङ) खलाः साधुध्वनिं उच्चारयन्ति ।

५. **अधस्तनानि पदानि शुद्धानि कृत्वा पुस्तिकायां लिखत**

व्रूयात्, रशबती, जीबितम्, केयुराणी, नालङ्कृताः, क्षियन्ते, वन्धनसृङ्खलाः, मणीनुपुराः

६. **परस्परं मेलयत**

| **समूहः 'क'** | **समूहः 'ख'** |
|---|---|
| सत्यं ब्रूयात् | सफलं तस्य जीवितम् |
| वाण्येका समलङ्करोति | बन्धनशृङ्खला इव |
| वाणी रसवती यस्य | प्रियं ब्रूयात् |
| मलदायकाः खला | या संस्कृता धार्यते |
| | मनस्तु साधुध्वनिभिः हरन्ति |

७. **अधस्तनानि पदानि प्रयुज्य सुललितानि सरलानि च वाक्यानि रचयत**

प्रियम्, सनातनः, यस्य, सफलम्, जीवितम्, भूषयन्ति, कुसुमम्, धार्यते, क्षीयन्ते, सततम्, खलाः, बन्धनशृङ्खलाः, पदे पदे, मणिनूपुराः

८. **पाठस्थानां पद्यानां अर्थान् पठित्वा 'मधुरभाषणस्य महत्त्वम्' इति विषये सुललितम् अनुच्छेदमेकं रचयत ।**

९. **अधस्तनस्य पद्यस्य भावार्थं स्वमातृभाषायां प्रकटयत**

प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः ।
तस्मात् प्रियं हि वक्तव्यं वचने का दरिद्रता ?

१०. **अधस्तनं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत**

दाता न दापयति दापयिता न दत्ते यो दानदापनपरो मधुरं न वक्ति ।
दानं च दापनमथो मधुरा च वाणी त्रीण्यप्यमूनि खलु सत्पुरुषे वसन्ति ॥

**प्रश्नाः**

(क) को न दापयति ?

(ख) को न दत्ते ?

(ग) मधुरं को न वक्ति ?

(घ) सत्पुरुषे कानि त्रीणि वस्तूनि वसन्ति ?

## ११. मञ्जूषायाः पदानि आदाय अधस्तनंचित्राधारेण रिक्तस्थानानि पूरयत



अत्र एकः ..... अस्ति । बहवः ........ सन्ति । गुरुः सदा .......... करोति । शिष्याः तस्य उपदेशं ......... शृण्वन्ति । गुरुकुलस्य वातावरणं ....... भवति । अत्र सर्वे ......... वदन्ति । शिष्याः परस्परं ........ कार्यं कुर्वन्ति । गुरोः ........ कुर्वन्ति । अत्र .......... अपि सन्ति । गवां दुग्धं ...... ......... च भवति ।

**गुरुः, शिष्याः, स्वच्छं शान्तम् च, हितोपदेशम्, मिलित्वा, सम्मानम्, मधुरं पौष्टिकं च, गावः, मधुरम्, सावधानतया**

## १२. अधस्तनीं कथां पठित्वा निर्दिष्टानि कार्याणि कुरुत

पुरा एकस्मिन् देशे एकः राजा आसीत् । तस्य अनेके सभासदः आसन् । सः समस्यानां समाधानाय तेषां विचारान् शृणोति स्म ।

एकस्मिन् रात्रौ राजा विचित्रं स्वप्नम् अपश्यत् । स्वप्ने तस्य सर्वे दन्ताः विनष्टा आसन् । एतादृशेन स्वप्नेन चिन्तितो राजा सभां समाह्वयत् । सभासदः सभाकक्षे उपस्थिता अभवन् । राजा तेषां समक्षे स्वप्नस्य वृत्तान्तं वर्णयामास । अन्त्ये च अपृच्छत्, ‘स्वप्ने मम सर्वे दन्ताः पतिताः । एतादृशस्य स्वप्नस्य अर्थः कः ?’ इति ।

सभासत्सु एकः अवदत्, ‘राजन् ! एतस्य स्वप्नस्य अर्थो वर्तते, भवतः सर्वे बान्धवः भवतः पूर्वम् एव म्रियन्ते’ इति । एतादृशं कठोरं वचनं श्रुत्वा राजा क्रुद्धः अभवत् । ‘कठोरभाषिणम् एनं दण्डयत’ इति सैनिकान् आदिदेश । सैनिका अपि राज्ञः आदेशानुसारेण तं दण्डेन प्रहृतवन्तः ।

ततो राजा पुनः अपरं सभासदम् अपृच्छत्, ‘मम स्वप्नस्य विषये तव कः विचारः ?’ इति । सः धैर्येण विचारयन् विनीतः सन् अवदत्, ‘राजन् ! एतस्य स्वप्नस्य अर्थः वर्तते, सर्वेषां बन्धूनाम् अपेक्षयां भवान् एवं चिरं जीविष्यति’ इति । तस्य एतादृशं मधुरं वचनं श्रुत्वा राजा प्रसन्नो बभूव । सः तस्मै बहूनि पारितोषिकानि दत्तवान् ।

‘बान्धवाः पूर्वम् एव म्रियन्ते’, ‘बन्धूनाम् अपेक्षया भवान् चिरं जीविष्यति’ इत्यनयोः वाक्ययोः अर्थः एक एव आसीत् । किन्तु प्रथमस्य सभासदः अभिव्यक्तिः कठोरा आसीत् । द्वितीयस्य च सभासदः अभिव्यक्तिः मधुरा आसीत् । अतः कठोरवाण्याः कठोरम् एव फलं लभ्यते, मधुरायाः च वाण्याः मधुरं फलं लभ्यते । अतः सर्वदैव मधुरं वक्तव्यम् ।

**(अ) समीचीनम् उत्तरं चिनुत**

(क) राजा केषां विचारान् शृणोति स्म ?

(अ) राज्ञीनाम् (आ) प्रजानाम् (इ) सभासदाम्

(ख) राज्ञः स्वप्ने किं पतितम् ?

(अ) केशाः (आ) दन्ताः (इ) रोमाणि

(ग) ‘कठोरभाषिणम् एनं दण्डयत’ इति राजा कान् आदिदेश ?

(अ) सैनिकान् (आ) द्वारपालान् (इ) बन्धून्

(घ) मधुरभाषिणं सभासदं राजा किम् अदात् ?

(अ) दण्डम् (आ) दुःखम् (इ) पारितोषिकानि

(ङ) कठोरवाण्याः फलं कीदृशं भवति ?

(अ) कठोरम् (आ) सामान्यम् (इ) मधुरम्

**(आ) पूर्णवाक्येन उत्तरं लिखत**

(क) स्वप्नेन चिन्तितो राजा किम् अकरोत् ?

(ख) प्रथमः सभासद् किम् अवदत् ?

(ग) द्वितीयस्य सभासदः कीदृशं वचनं श्रुत्वा राजा प्रसन्नो बभूव ?

(घ) प्रथमद्वितीययोः सभासदोः अभिव्यक्तौ कः भेदः ?

१२. **अधस्तनम् अनुच्छेदं पठित्वा उत्तराणि लिखत**

काकः कृष्णः भवति । पिकः अपि कृष्णः एव भवति । एतयोः रूपम् समानं भवति । कोकिलस्य वाणी मधुरा भवति । काकस्य वाणी च कठोरा भवति । अतः जनाः कोकिलस्य मधुरां वाणीं श्रोतुं वाञ्छन्ति । काकस्य कठोरां वाणीं तु श्रोतुं नैव वाञ्छन्ति ।

**प्रश्नाः**

(क) काकपिकयोः रूपं कीदृशं भवति ?

(ख) कोकिलस्य वाणी कीदृशी भवति ?

(ग) काकस्य वाणी कीदृशी भवति ?

(घ) जनाः कीदृशीं वाणीं श्रोतुं वाञ्छन्ति ?

१३. **अधस्तने पद्ये पठित्वा प्रश्नानाम् उत्तरं लिखत**

**मूर्खोऽपि शोभते तावत् सभायां वस्त्रवेष्टितः ।**
**तावच्च शोभते मूर्खो यावत् किञ्चिन्न भाषते ॥**
**मूर्खस्य पञ्च चिह्नानि गर्वो दुर्वचनं तथा ।**
**क्रोधश्च दृढवादश्च परवाक्येष्वनादरः ॥**

**प्रश्नाः**

(क) मूर्खः कियत्कालं सभायां शोभते ?

(ख) मूर्खस्य कति चिह्नानि ?

(ग) मूर्खस्य चिह्नानि लिखत ।

## व्यवहारानुशीलनम्

**१. तव कक्षायां कस्य वाणी अतीव मधुरा अस्ति ? विमर्शं कुरुत। तस्य वाणी किमर्थं प्रभावकारिणी वर्तते ? कारणानि च लिखत।**

**२. 'मधुरवाणी' इति विषये सुन्दरं गीतं, मनोहरं कवितां वा लिखित्वा कक्षायां श्रावयत।**

**३. समुचितविकल्पे (✓) चिह्नं दत्त**

(क) तुभ्यं कीदृशः जनः रोचते ?

(अ) मधुरभाषी (आ) कठोरभाषी (इ) मूकः

(ख) तव भ्राता सम्यङ् न पठति चेत् त्वं किं करोषि ?

(अ) दण्डेन ताडयामि

(आ) कठोरवचसा तर्जयामि

(इ) मधुरवचसा तं पठनाय प्रेरयामि

(ग) मार्गे याचकः रूप्यकाणि याचितवान्, तव पार्श्वे रूप्यकाणि न सन्ति चेत् त्वं किं करोषि ?

(अ) दुर्वचनेन तं तिरस्करोमि।

(आ) 'मम पार्श्वे नास्ति' इति कोमलवाण्या वदामि।

(इ) गृहं गत्वा रूप्यकाणि आनीय ददामि।

(घ) पिता भगिनीं कठोरवचसा तर्जयन् अस्ति, त्वं किं करोषि ?

(अ) पितरं तर्जयितुं निषेधामि, भगिनीं च आश्वासयामि।

(आ) अहम् अपि पित्रा सह मिलित्वा भगिनीं तर्जयामि।

(इ) ततः अन्यत्र एव गच्छामि।

नवमः पाठः

# गोमायुदुन्दुभिकथा

कस्मिँश्चित् समये गोमायुर्नामकः शृगालो बुभुक्षितः सन् आहारार्थम् इतस्ततः परिभ्रमन् वनं जगाम। तत्र सः सैन्यद्वयसंग्रामभूमिमपश्यत्। सः तस्यां भूमौ पतितस्य वायुवशाद् वल्लीशाखाग्रैर्हन्यमानस्य दुन्दुभेः ध्वनिमश्रावीत्।

अथ सः तद्-ध्वनिना भयभीतः सन् चिन्तयामास - अहो ! अद्य मम मरणं निश्चितमिति। सः विचारितवान्- मया इतः क्षणमेव गन्तव्यं भविष्यति, नोचेत् विनष्टोभविष्यामि। सः पुनरपि विचारितवान्- तथा न, अहं पूर्वं प्रोच्चारितशब्दस्य कारणं ज्ञास्यामि तावत्तत्रैव चलामीति। उक्तमप्यस्ति यत्



**भये वा यदि वा हर्षे सम्प्राप्ते यो विमर्शयेत् ।**

**कृत्यं न कुरुते वेगान्न स सन्तापमाप्नुयात् ॥**

अर्थात् हर्षावस्थायां भयावस्थायां यः सम्यक् विचारयति अथवा अज्ञात्वा कार्यं न कुरुते सः सन्तापं न लभते इति । अतः पूर्वं कस्यायं शब्दः ? तज्जानामीति विमर्शयन् सः शनैः शनैः अग्रे अगच्छत् । सः तावद् दुन्दुभिमपश्यत् । स च तं दुन्दुभिं परिज्ञाय समीपं गत्वा स्वयमेव अताडयत् । तदनन्तरं हर्षितः सन् अचिन्तयत् - अहो मम प्रभूततरं भोजनमत्र समायातम् । सत्यमेव एतत्तु प्रभूतमांसमेदोऽसृग्भिः परिपूरितमस्ति ।

ततः परुषचर्मवेष्टितं दुन्दुभिं महता परिश्रमेण विदार्य तस्य एकदेशे छिद्रं कृत्वा प्रसन्नमनसा मध्ये प्राविशत् । तद्विदारणकाले तस्य दन्ताः खण्डिताः आसन् । स अन्तः प्रविश्य सर्वमपश्यत् परन्तु तत्र सः दारुशेषमेवावलोक्य अवदत् -

**पूर्वमेव मया ज्ञातं पूर्णमेतद्धि मेदसा ।**

**अनुप्रविश्य विज्ञातं यावच्चर्म च दारु च ॥**

अतः एतेन ज्ञायते यद् शब्दमात्रान्नभेतव्यम् इति ॥

## अभ्यासः

१. **पाठस्य द्वितीयानुच्छेदस्य सस्वरपठनं कुरुत ।**

२. **शुद्धमुच्चारयत ।**

कस्मिँश्चित्, शाखाग्रैः, विनष्टो, विमर्शयन्, परुषचर्मवेष्टितम्, भेतव्यम् ।

३. **एकपदेन उत्तरयत ।**

(क) शृगालस्य नाम किम् ?

(ख) शृगालः वने किमपश्यत् ?

(ग) तत्र प्रोच्चारितः शब्दः कस्य आसीत् ?

(घ) शृगालः केन भयभीत आसीत् ?

(ङ) कस्मान्न भेतव्यम् ?

४. **पूर्णवाक्येन उत्तराणि लिखत ।**

(क) शृगालः वने किमर्थं परिभ्रमन् आसीत् ?

(ख) शृगालः कीदृशं ध्वनिम् अश्रावीत् ?

(ग) कः सन्तापं न लभते ?

(घ) शृगालः किमर्थं हर्षितः ?

(ङ) शृगालस्य दन्ताः कथं खण्डिताः ?

(च) दुन्दुभिः कीदृश आसीत् ?

(छ) पाठे प्रदत्तौ श्लोकौ लिखत ।

५. **समीचीनकथने आम् असमीचीनकथने न इति लिखत ।**

(क) गोमायुः सिंह आसीत् ।

(ख) दुन्दुभिः शृगालम् अपश्यत् ।

(ग) दुन्दुभिः कठोरचर्मणा परिवेष्टित आसीत् ।

(घ) तस्य दन्ताः खण्डिता आसन् ।

६. **पाठस्य सन्देशं स्ववाक्यैः लिखत ।**

७. **परस्परं मेलयत**

| | |
|---|---|
| शृगालः | लता |
| शब्दः | विचारः |
| वल्ली | जम्बुकः |
| भूमि | ध्वनिः |
| विमर्शः | पृथ्वी |

८. **शुद्धं कुरुत**

वल्लि, वीनस्टः, ग्यास्यामी, बिमर्सः, बिदाएं

९. **अधस्तनानि पदानि प्रयुज्य वाक्यानि रचयत ।**

जगाम, विमर्शयन्, हर्षितः, समीपम्, सन्तापः, प्रभूततरम्

१०. **अधस्तनयोः श्लोकयोः नेपालीभाषायामर्थं लिखत ।**

भये वा यदि वा हर्षे सम्प्राप्ते यो विमर्शयेत् ।
कृत्यं न कुरुते वेगान्न स सन्तापमाप्नुयात् ॥
पूर्वमेव मया ज्ञातं पूर्णमेतद्धि मेदसा ।
अनुप्रविश्य विज्ञातं यावच्चर्म च दारु च ॥

११. **प्रदत्तां कथां पठित्वा प्रश्नान् उत्तरयत ।**

## बुद्धिपरीक्षा

कुत्रचित् कुसुमपुरं नामकम् एकं नगरम् आसीत् । तत्र नन्दनामक राजा आसीत् । स अतीव बुद्धिमान् आसीत् । तस्य नृपस्य मन्त्रिमण्डलस्य एकम् मन्त्रिपदम् अपूर्णम् आसीत् । अत एकदा “मम राज्यस्य पण्डितानां बुद्धिपरीक्षां करोमि । ततः तेभ्यः एकं जनं चित्वा तस्मै मन्त्रिपदम् यच्छामि” इति चिन्तयित्वा राजा एकां पण्डितसभाम् अकारयत् । तत्र अनेके बुद्धिमन्त आगच्छन् । स नृप एकं दारुखण्डं तान् दर्शयित्वा अवदत् - “अस्य दारुखण्डस्य मूलभागः कः? अग्रभागश्च कः ? इति वदन्तु ।”

तत्र सर्वे पण्डिताः चिन्तायां निमग्ना आसन् । तेषु पण्डितेषु सुबुद्धिनामक एकः बुद्धिमान् पण्डित अपि आसीत् । सः नृपस्य प्रश्नं श्रुत्वा शीघ्रं तस्य समीपम् अगच्छत् अकथयत् च, "महाराज ! अत्र विचारणीयं किम् अस्ति ? तं दारुखण्डं जले निक्षिपतु । यः भागः जले निमज्जति सः मूलभागः, यतः मूले एव भारः भवति । यः भागः जलस्य उपरि भवति सः च अग्रभागः" इति । तस्य उत्तरेण राजा सन्तुष्ट अभवत् । अतः सः सुबुद्धये एव मन्त्रिपदम् अयच्छत् ।

**प्रश्नाः**

(क) नृपस्य नाम किम् आसीत् ?

(ख) नृपः कस्मै मन्त्रिपदम् अयच्छत् ?

(ग) नन्दः कस्य नगरस्य नृप आसीत् ?

(घ) कस्य उत्तरेण राजा सन्तुष्ट अभवत् ?

(ङ) दारुखण्डस्य मूलभागः कुत्र निमज्जति ?

## व्यवहारानुशीलनम्

१. पाठस्य कथायाः आशयं ज्ञात्वा शब्दमात्रान्न भेतव्यमिति विषये विमर्शनं कुरुत ।

२. कक्षायां क्रमशः एकैकां चाटुकथां श्रावयत ।

३. समुचिते विकल्पे (✓) दत्त ।

(क) कार्यकरणात् पूर्वं किं करोषि ?

(अ) विचारयामि (आ) किमपि न करोमि (इ) अविचार्यैव करोमि

(ख) कार्यं करणीयं भविष्यति ।

(अ) दुःखितमनसा (आ) प्रसन्नमनसा (इ) अधैर्यवशाद्

(ग) बुभुक्षाकाले आवश्यकम् ।

(अ) धैर्यम् (आ) भोजनम् (इ) मौनम्

दशमः पाठः

# प्राप्तव्यमर्थं लभते मनुष्यः

सम्पूर्णकुम्भो न करोति शब्द
मर्धो घटो घोषमुपैति नूनम् ।
विद्वान् कुलीनो न करोति शब्दं
जल्पन्ति मूढास्तु गुणैर्विहीनाः॥

प्राप्तव्यमर्थं लभते मनुष्यो
देवोऽपि तं लङ्घयितुं न शक्तः ।
तस्मान्न शोचामि न विष्मयो मे
यदस्मदीयं न हि तत्परेषाम् ॥

अर्थागमो नित्यमरोगिता च
प्रिया च भार्या प्रियवादिनी च ।
वश्यश्च पुत्रोऽर्थकरी च विद्या
षड्जीवलोकस्य सुखानि राजन् ।

## प्रथमः श्लोकः

**पदच्छेदः**

सम्पूर्णः, कुम्भः न, करोति, शब्दम् , अर्धः, घटः, घोषम्, उपैति, नूनम्, विद्वान् , कुलीनः, न, करोति, गर्वम्, जल्पन्ति, मूढाः, तु, गुणैः, विहीनाः ।

**सरलार्थः**

जलपूर्णो घटः कदापि शब्दं न निष्काशयति परन्तु अर्धजलयुतो घटः अवश्यमेव शब्दं निष्काशयति । अतः ज्ञानिनः विद्वांसः कदापि दर्पं न कुर्वन्ति, केवलमल्पज्ञा एव बहुभाषन्ते ।

## द्वितीयः श्लोकः

**पदच्छेदः**

प्राप्तव्यम्, अर्थम्, मनुष्यः लभते, देवः, अपि, तम्, लङ्घयितुम्, न, शक्तः, तस्मात्, न, शोचामि, न विष्मयः, मे, यद् अस्मदीयम्, न, हि, तत्, परेषाम् ।

**सरलार्थः**

मनुष्यः येन केन प्रकारेणापि प्राप्तव्यम् अर्थमवश्यमेव लभते । दैवोऽपि तं निवारयितुं न शक्नोति । अतः मत्कृते शोको नास्ति, हर्षोऽपि नास्ति । यद् अस्मदीयं अस्ति, तत् परेषां भवितुं नैव शक्नोति ।

## तृतीयः श्लोकः

**पदच्छेदः**

अर्थागमः, नित्यम्, अरोगिता, च, प्रिया, च, भार्या, प्रियवादिनी, च, वश्यः, च पुत्रः, अर्थकरी, च, विद्या, षट्, जीवलोकस्य, सुखानि, राजन् ।

**सरलार्थः**

हे राजन् ! सदैव धनार्जनं भवेत्, शरीरे रोगो न समागच्छेत्, पत्नी प्रिया, सत्यवादिनी च भवेत्, पुत्रः आज्ञापालको भवेत्, आर्जिता विद्या च अर्थकरी भवेदिति एते मानवमात्रस्य षट् सुखसाधनानि सन्ति ।

## अभ्यासः

### पाठानुशीलनम्

१. **पाठस्थानां त्रयाणां श्लोकानां सस्वरपठनं, श्रुतिलेखनं च कुरुत ।**

२. **सङ्क्षेपेण उत्तरयत ।**

(क) कुलीनो विद्वान् किं न कुरुते ?

(ख) मनुष्यः किं लभते ?

(ग) देवः कं लङ्घयितुं न शक्नोति ?

(घ) भार्या कीदृशी भवेत् ?

(ङ) अल्पज्ञाः किं कुर्वते ?

(च) मानवजीवनस्य सुखसाधनानि कानि ?

३. **कोष्ठस्य पदानि प्रयुज्य रिक्तस्थानं पूरयत ।**

**(प्राप्तव्यम्, गर्वम्, रोगः, आज्ञाकारी )**

(क) पुत्रः ......... भवेत् ।

(ख) शरीरे .......... न आगच्छेत् ।

(ग) मूढः ............. करोति ।

(घ) मानवः ........... अर्थं लभते ।

४. **शिक्षकस्य सहाय्येन सस्वरं श्लोकवाचनं कुरुत ।**

**खादन्न गच्छामि हसन्न जल्पे गतं न शोचामि कृतं न मन्ये ।**

**द्वाभ्यां तृतीयो न भवामि राजन् किं कारणं भोज भवामि मूर्खः॥**

५. **अधस्तनस्य श्लोकस्य पदच्छेदं कुरुत**

**मृगाः मृगैः सङ्गमनुव्रजन्ति गावश्च गोभिस्तुरगास्तुरङ्गैः।**

**मूर्खाश्च मूर्खैः सुधियः सुधीभिः समानशीलव्यसनेषु सख्यम् ॥**

६. **श्लोकसमन्वयं कुरुत ।**

| | |
|---|---|
| विद्वान् कुलीनो न करोति शब्दं | प्रिया च भार्या प्रियवादिनी च । |
| प्राप्तव्यमर्थं लभते मनुष्यो | षड्जीवलोकस्य सुखानि राजन् । |
| अर्थागमो नित्यमरोगीता च । | जल्पन्ति मूढास्तु गुणैर्विहीनाः । |
| वश्यश्च पुत्रोऽर्थकरी च विद्या | देवोऽपि तं लङ्घयितुं न शक्तः । |

७. **पदानि प्रयुज्य वाक्यानि रचयत ।**

अर्धम्, गर्वम्, विष्मयः, अस्मदीयम्, वश्यः

८. **श्लोकं पठित्वा नेपालीभाषायाम् अर्थं लिखत ।**

विद्या विवादाय धनं मदाय शक्तिः परेषां परपीडनाय ।

खलस्य साधोर्विपरीतमेतत् ज्ञानाय दानाय च रक्षणाय ॥

९. **अधस्तनं श्लोकं पठित्वा प्रदत्तान् प्रश्नान् उत्तरयत ।**

चित्ते भ्रान्तिर्जायते मद्यपानाद् भ्रान्ते चित्ते पापचर्यामुपैति ।

पापं कृत्वा दुर्गतिं यान्ति मूढास्तस्मान्मद्यं नैव पेयमपेयम् ॥

**प्रश्नाः**

(क) मद्यपानात् कि भवति ?

(ख) मूढाः किं कृत्वा दुर्गतिं यान्ति ?

(ग) किं न पेयम् ?

(घ) जनः कथं पापचर्याम् उपैति ?

१०. **चित्रं विलोक्य पञ्चभिर्वाक्यै वर्णयत ।**



## व्यवहारानुशीलनम्

१. **तव समाजस्य कस्यापि अभियन्तुः परिचयं, योगदानञ्च विलिख्य कक्षायां श्रावयत ।**

२. **संस्कृतभाषायां सरलशब्देन एकम् अनुच्छेदं विरचय्य कक्षायां श्रावयत ।**

३. **समुचितविकल्पे चिह्नं (✓) दत्त**

(क) त्वं किं पिबसि ?

(अ) मादकम् (आ) धूमम् (इ) दुग्धम्

(ख) त्वं गृहकार्यं करोषि?

(अ) यदा कदा करोमि (आ) सदैव करोमि (इ) न करोमि

(ग) त्वं सदैव पितरौ नमसि)

(अ) नमामि (आ) न नमामि (इ) यदा कदा

एकादशः पाठः

# गुरुसेवा

ज्ञानदाता जीवनस्य पथदर्शकश्च गुरुः कथ्यते । मानवानां सुखाय शान्तये समृद्ध्यै च गुरोः कृपा अतुल्या भवति । जीवनदातारौ जनकः जननी च भवतः परं जीवननिर्माता गुरुः एव मन्यते । गुरुः शिष्यान् सर्वाभ्यः बाधाभ्यः पारं नयति । गुरुणा विना वयं जीवने कुत्रापि साफल्यं प्राप्तुं न शक्नुमः । अतः गुरोः कृपायाः तुलना कुत्रापि न भवति ।

अस्माकं शास्त्रेषु संस्कृतौ च गुरोः महत्त्वं नितरां वर्णितमस्ति । गुरुः ब्रह्म-विष्णु-महेश्वरवत् देवः एव मन्यते । गुरोः सेवया सर्वाः विद्याः प्राप्तुं शक्यते । गुरोः सेवन-पूजनार्चनादिकर्मभिः शिष्याः विद्यावन्तः आचारवन्तश्च भवन्ति । “गुरुशुश्रूषया विद्या” यद् उक्तमस्ति तत् सत्यमेव ।

गुरोः सेवायाः भक्तेश्च सुदीर्घा परम्परा वर्तते । पुरा अद्वितीयाः गुरुभक्ताः सेवकाश्च आसन् । वैदिक-पौराणिकग्रन्थेषु गुरुसेवाभक्त्योः आदर्शदर्शिकाः कथाः लभ्यन्ते । देवाः दानवाश्च स्वस्वगुरुं सेवन्ते स्म । देवाः बृहस्पतिं दानावाश्व शुक्राचार्यं गुरुं स्वीकृतवन्तः । शक्तिशालिनः



राजानश्च गुरोः आदेशं निर्देशनं च परिपाल्य चलन्ति स्म । ते गुरोः सम्मत्या एव कार्याणि अकुर्वन् । श्रीरामः वशिष्ठं श्रीकृष्णश्च सान्दीपनिं गुरुं मत्वा ताभ्यां विद्याविनयादिगुणराशिम् अलभताम् । विदेहराजः जनकोऽपि महर्षेः याज्ञवल्क्याद् ब्रह्मज्ञानम् अवाप्य मुक्तः अभवत् । स गुरोः सेवया जगति महतीं कीर्तिं विस्तारितवान् ।

गुरोः महत्त्वं निभाल्य एव "आचार्यदेवो भव" इति आर्षवचनं प्रचलितं वर्तते । यः जगति जायते स ऋषिदेवपितृणाम् ऋणी भवतीति कथ्यते । ऋषिकल्पं गुरुं संसेव्य यः कोऽपि ऋषि-ऋणाद् मुक्तो भवति । वयमपि गुरुं संसेव्य अस्माद् ऋणात् मुक्ताः भवितुं शक्नुमः । गुरुसेवकैः गुरोः मूर्तिः ध्यातव्या भवति । तस्य पादयुगलं पूजामूलं मन्तव्यम् । गुरोः वाक्यं मन्त्रमूलं स्वीकर्तव्यम् । गुरोः कृपा च कर्ममूलं भवतीति विचारणीयम् । उक्तञ्च-

**ध्यानमूलं गुरोर्मूर्तिः पूजामूलं गुरोः पदम् ।**

**मन्त्रमूलं गुरोर्वाक्यं कर्ममूलं गुरोः कृपा ॥**

गुरुसेवा ईश्वरसेवा भवति । गुरुः अविवेकेन न कदापि उपेक्षणीयः । गुरौ असूयावृत्तिश्च न प्रदर्शनीया । गुरोः नाम-गति भाषित-चेष्टितानि अनुकृत्य अपमानः न कर्त्तव्यः । गुरोः अपमानः परमेश्वरस्य अपमानः भवति । स्वयं भगवान् श्रीकृष्णः आत्मानं गुरुं निगदति-

**आचार्यं मां विजानीयान्नावमन्येत कर्हिचित् ।**

**न मर्त्यबुद्ध्याऽसूयेत सर्वदेवमयो गुरुः ॥**

सम्प्रति जनाः सद्गुरोः अन्वेषणाय परिभ्रमन्तः दृश्यते । शिष्याः इव अन्ये जनाश्च सद्गुरुम् अन्वेष्टुं यत्नरताः सन्ति । गुरोः मार्गदर्शनेन ते जीवनं सुखेन यापयन्तः वर्तन्ते । गुरुहीनः जनः अज्ञानस्य अन्धकारे निपत्य दुःखं प्राप्नोति ।

गुरुः सदैव सेव्यः सम्मान्यश्च वर्तते । गुरोः सेवया सम्मानेन च न केवलं गुरोः एव, अपि तु शिष्याणां सेवकानामपि मनःप्रसादनं भवति । ते विद्याभ्यासादिकर्मसु नैपुण्यं लभन्ते । अधुनापि गुरुपूर्णिमापर्वणि विशेषकार्यक्रमम् आयोज्य गुरुणां सेवासम्मानाभिनन्दनानि विधीयन्ते । एषा अस्माकं परम्परा वर्तते । उपनिषदि गुरोः उद्दालकस्य गुरुभक्तस्य शिष्यस्य आरुणेश्च प्रेरणादायिनी कथा वर्तते । गुरोः उद्दालकस्य आज्ञां पालयन् शिष्यः आरुणिः सर्वाः विद्याः लब्धवान् । पुरातनकाले शिष्याः स्वप्राणान् अपि पणीकृत्य गुरुसेवायां तत्पराः भवन्ति स्म । गुरोः सेवा-सम्मानाभिनन्दनैः आचरणं च शुद्धं भवति । शुद्धाचरणेन सर्वत्र विजयः लभ्यते । गुरुसेवा सदैव अस्माकं हिताय भवति ।

### शिक्षणालोकः

स्वविद्यालयस्य शिष्याः गुरुणां सेवा-सम्मानाभिनन्दकार्येषु प्रेरणीयाः। गुरोः सेवायाः लाभान् वर्णयितुमपि तेभ्यः निर्देशनं प्रदातव्यम्।

## अभ्यासः

### पाठानुशीलनम्

१. **पाठस्य सर्वेषाम् अनुच्छेदानां सम्यग् उच्चारणं विदधत।**

२. **शुद्धोच्चारणं कुरुत**

समृद्ध्यै, ब्रहमविष्णुमहेश्वरवत्, गुरुशुश्रूषया, विद्याविनयादिगुणराशिम्, याज्ञवल्क्यात्, ऋषिदेवपितृणाम्, असूयावृत्तिश्च, विद्याभ्यासादिकर्मसु, पणीकृत्य

३. **सङ्क्षेपेण उत्तरयत**

(क) गुरोः कृपा किमर्थम् अतुल्या भवति ?

(ख) शास्त्रेषु किं वर्णितम् अस्ति ?

(ग) शक्तिशालिनः राजानः किं कुर्वन्ति स्म ?

(घ) महती कीर्तिः कथं विस्तारयितुं शक्यते ?

(ङ) भगवान् श्रीकृष्णः किं निगदति ?

(च) गुरुपूर्णिमायां किं क्रियते ?

(छ) कैः कर्मभिः आचरणं शुद्धं भवति ?

(ज) गुरुसेवा केषां हिताय भवति ?

४. **सत्यकथने 'आम्' असत्यकथने 'न' च लिखत**

(क) गुरुणा विना जीवने साफल्यं प्राप्यते। ( )

(ख) "गुरुशुश्रूषया विद्या" इत्युक्तिः सत्या वर्तते। ( )

(ग) याज्ञवल्क्यः ब्रहमज्ञानी आसीत्। ( )

(घ) वयं ऋषिऋणाद् मुक्तिं वाञ्छामः । ( )

(ङ) अज्ञानस्य अन्धकारे सुखं भवति । ( )

(च) गुरोः सेवया मनःप्रसादनं न भवति । ( )

(छ) शुद्धाचरणं विजयस्य कारणम् अस्ति । ( )

**५. 'गुरुसेवा' इति विषये सरलभाषया अनुच्छेदमेकं रचयत ।**

**६. पाठस्य तृतीयानुच्छेदस्य अनुलेखनं कुरुत ।**

**७. पाठे प्रयुक्तस्य श्लोकद्वयस्य अर्थं वदत ।**

**८. पाठाधारेण रिक्तस्थानं पूरयत**

(क) जीवनदातारौ .................................... च भवतः ।

(ख) गुरुः ................................. देवः एव मन्यते ।

(ग) देवाः .................... गुरुं स्वीकृतवन्तः ।

(घ) ....................... जनकोऽपि ब्रह्मज्ञानं प्राप्तवान् ।

(ङ) गुरौ....................... न प्रदर्शनीया ।

(च) आरुणिः सर्वाः ................. लब्धवान् ।

(छ) शुद्धाचरणेन सर्वत्र....................... लभ्यते ।

**९. कथां पठित्वा उत्तराणि लिखत**

पुरा कस्मिँश्चन राज्ये एको न्यायप्रियो राजा आसीत् । सः प्रजानां सम्यक् सुरक्षां करोति स्म । प्रजा अपि तस्य सम्मानं कुर्वन्ति स्म । प्रजानां निरीक्षणाय राजा एकदा सामान्यपुरुषाणां वेषेण राज्ये भ्रममाण आसीत् । मार्गे गच्छन् स एकं वृद्धं ददर्श, यः आम्रवृक्षं रोपयन् आसीत् । जरसा पलितं तं वृद्धं दृष्ट्वा राजा अपृच्छत्, "भवान् किं करोति ?" वृद्धः अवदत्, "आम्रवृक्षस्य रोपणं कुर्वाणोऽस्मि ।" वृद्धस्योत्तरं श्रुत्वा राजा मनसा अचिन्तयत्, "एषः अतीव वृद्धः । आम्रवृक्षः मन्दं वर्धते । एतस्य फलानि वृद्धः खादितुं नैव प्राप्स्यति । व्यर्थ एवैतस्य प्रयासः।" एतद् विचार्य राजा अवोचत्, "आम्रवृक्षाः शीघ्रं नैव वर्धन्ते, एतस्य फलानि खादितुं भवान् जीवितो भविष्यति वा ?" राज्ञः एतादृशं वचनं श्रुत्वा वृद्धः उत्तरयामास, "आम् ! अहं नैव जीविष्यामि एतत् सत्यम् । किन्तु यदि एतदेव विचार्य अन्यैराम्रवृक्षाः नैव रोपिता आसन् चेद् मम का अवस्था जायेत ?

अन्यैः रोपितानाम् आम्राणां मया फलानि खादितानि । ममोपरि तेषाम् ऋणं वर्तते । अहमेतं वृक्षं रोपामि, एतेन च अन्ये लाभान्विताः भविष्यन्ति । एतेन अहं ऋणमुक्तो भविष्यामि ।" एतत् श्रुत्वा राजा लज्जया अवनतो बभूव । तं प्रणम्य ततोऽन्यत्र भ्रमणाय गतवान् ।

**(क) एकपदेन उत्तरयत**

(अ) राजा कीदृशः आसीत् ?

(आ) वृद्धः कस्य फलस्य वृक्षं रोपयन् आसीत् ?

(इ) आम्रवृक्षः कथं वर्धते ?

(ई) वृद्धस्य प्रयासः व्यर्थः सार्थो वा ?

**(ख) पूर्णवाक्येन उत्तरयत**

(अ) राजा किमर्थं राज्ये भ्रममाण आसीत् ?

(आ) राजा मनसा किम् अचिन्तयत् ?

(इ) राज्ञः वचनं श्रुत्वा वृद्धः किम् अवदत् ?

(ई) वृद्धः कथम् ऋणमुक्तो भविष्यति ?

**१०. पदानि शुद्धानि कृत्वा लिखत**

निगध्यते, सान्दीपनी, ऋषिकप्लं, स्विकर्तव्यम्, चेष्टीतानि, शूयते, नैपूण्यं, उद्धालकस्य, पणीकृत्वा ।

**११. अधस्तनानि पदानि प्रयुज्य एकैकं वाक्यं रचयत**

शान्तये, तुलना, नितराम्, लभ्यन्ते, निर्देशनम्, सेवया, ज्योतिः, निभाल्य, पूजामूलम्, अपमानः, सुखेन, एषा, आचरणम् ।

**१२. अधोलिखितम् अनुच्छेदं पठित्वा शीर्षकं लिखत**

प्राणिषु मानवैः एव वाणी प्रयुज्यते । अन्ये जन्तवोऽपि स्वसमुदाये सङ्केतं कुर्वन्ति परं वक्तुं न शक्नुवन्ति । वाणी स्पष्टा अस्पष्टा कर्कशा मधुरा सभ्या असभ्या चेति नामाभिः नैकविधा भवति । मानवैः कीदृशी वाणी वक्तव्या ? इति विमर्शनस्य विषयः । मानवाः स्वान् सभ्यान् वदन्ति । एतेषां श्रवणेन्द्रियमपि मधुरां वाणीं श्रोतुमिच्छति । कर्कशवाण्या

शत्रवः, मधुरवाण्या मित्राणि च वर्धन्ते । वयं मित्राणि वर्धयितुम् इच्छामः । मधुरवाणी मधुरजीवनस्य कारणं भवति । वाणीभेदेन मानवानां परिचयः प्राप्यते ।

१३. **अधोलिखितमनुच्छेदं पठित्वा उत्तराणि लिखत**

मातापित्रोः गुरुणां च सर्वैः सेवा विधेया । मातापितरौ अस्माकं पालनं पोषणं च कुरुतः । माता एव अस्माकं प्रथमगुरुरूपा अस्ति । अत एव ऋषयो "नास्ति मातृसमो गुरुः" इत्यवोचन् । पिता त्वस्माकं गुरुरेव वर्तते, योऽस्मान् अनुशासनं शिक्षयति । व्यवहारं च शिक्षयति । पुरा यदा विद्यालयाः नासन् तदा पिता एव स्वकीयं पुत्रं शिक्षयति स्म । पुराणेषु शास्त्रेषु उपनिषत्सु च पित्रा एव पुत्रशिक्षणं विहितमिति कथाः लभ्यन्ते । मातापितरौ च महागुरु उच्येते । गुरुरपि पिता इव अस्माकं रक्षां विदधाति । जीवनोपयोगीनि ज्ञानानि च अस्मभ्यं ददाति, येषां प्रयोगद्वारा अस्माकं जीवनं सार्थकं समृद्धं च भवति । अतोऽस्माभिर्मातापित्रोः गुरुणां च सेवा विधेया । उच्यते च,

**मातापित्रोः गुरुणां च पूजा बहुमता स्मृता ।**

**इह युक्तो नरो लोकान् यशश्च महदश्नुते ॥ इति ।**

**प्रश्नाः**

(क) केषां सेवा विधेया ?

(ख) अस्माकं प्रथमगुरुरूपा का अस्ति ?

(ग) पित्रा पुत्रस्य शिक्षणस्य कथाः कुत्र लभ्यन्ते ?

(घ) कौ महागुरु ?

(ङ) केषां पूजा बहुमता ?

(च) मातापित्रोः सेवया जनः किम् अश्नुते ?

## व्यवहारानुशीलनम्

**१. गुरुणां सेवायै सम्मानाय च किं कर्तुं शक्यते ? सखिनां मध्ये विमृशत ।**

**२. गुरुसेवाभावदर्शकम् एकं कार्यक्रमं कक्षायां श्रावयत ।**

**३. स्वस्य अभिभावकस्य गुरोः विषये कथयत ।**

**४. आत्मनः विद्यालये गुरुपूर्णिमायां किं क्रियते ? वदत ।**

**५. समुचितविकल्पे (✓) चिह्नं दत्त**

(क) विद्यालये गुरुन् दृष्ट्वा त्वं किं करोषि ?

(अ) शीघ्रं धावामि

(आ) गुरुन् प्रणमामि

(इ) उपहासं करोमि

(ख) कक्षायां गुरोः सम्मानाय त्वं किं करोषि ?

(अ) सम्यक् पठामि, तस्य वचनानि अनुसरामि च ।

(आ) सखिभिः सह मिलित्वा कोलाहलं करोमि ।

(इ) प्रतिदिनं पुष्पमालया तस्य अभिनन्दनं करोमि ।

(ग) मार्गे गच्छन्तं गुरुं दृष्ट्वा त्वं किं करोषि ?

(अ) बिभेमि(आ) किमपि नैव करोमि

(इ) तमाहूय नमस्करोमि

(घ) गुरोस्तर्जनं श्रुत्वा त्वं किं करोषि ?

(अ) गुरवे क्रुध्यामि ।

(आ) स्वस्य व्यवहारे परिष्कारं करोमि ।

(इ) पुनः कक्षायां कदापि नैव गच्छामि ।

द्वादशः पाठः

# महर्षिः याज्ञवल्क्यः

महर्षिः याज्ञवल्क्यः नेपालस्य मिथिलाप्रदेशस्थः अध्यात्मवेत्ता विद्वान् आसीत् । एतस्य पिता देवरातः, माता च देवी सुनन्दा आस्ताम् । ईशापूर्व-द्वादशशताब्दी एतस्य समयः आसीदित्यत्र विद्वत्सु नाधिकं मतवैविध्यम् । राजर्षेः जनकस्य सभायां शास्त्रार्थे एष सर्वान् विदुषः पराजित्य तदानीन्तनः ब्रह्मविद्वरिष्ठः समुद्घोषितः आसीत् । तदानीं राजर्षिः जनकः, कुरु-पाञ्चालादिदेशीयाः विद्वांसः, विदुषी गार्गी, अन्ये तत्त्वचिन्तकाः मुनयश्च शास्त्रार्थविजयिनः एतं भृशं प्रशंसयामासुः ।



एषः वैशम्पायनस्य प्रियशिष्यः आसीत्। बाल्यादेव तीक्ष्णमतिः एष तस्य शिष्येषु सर्वोत्तमः आसीत्। एकदा गुरुशिष्ययोः मिथः विवादकारणेन कोपवशात् वैशम्पायनः स्वाध्यापितां वेदविद्यां वमितुम् आदिशत्। एष योगबलेन वैशम्पायनात् प्राप्ताः सर्वाः अपि वेदविद्याः योगबलेन मूर्तरूपेण अवमत्। अन्ये शिष्याः मुनयश्च तित्तिरिरूपेण सश्रद्धं वमितविद्यानां ग्रहणं चक्रुः। वमिता सैव वेदविद्या 'कृष्णयजुर्वेदः' इति नाम्ना प्रख्यातिङ्गता। तत्सम्बद्धः ब्राह्मणग्रन्थश्च 'तैत्तिरीयब्राह्मणः' इति वर्तते। 'पुनः मानवगुरोः सकाशात् विद्याग्रहणं नोचितम्' इति विनिश्चित्य याज्ञवल्क्यः सूर्यदेवात् विद्याध्ययनं चकार। सूर्यदेवः वाजसनिरूपेण वेदम् उपादिशत्। वाजसनेः शिष्यत्वेन याज्ञवल्क्यः वाजसनेयः वर्तते। अतः एतेन सूर्यदेवात् अधीता सा एव वेदसंहिता 'शुक्लयजुर्वेदस्य वाजसनेयिसंहिता' इति कथ्यते। एतत्सम्बद्धः ब्राह्मणः शतपथब्राह्मणः, उपनिषच्च बृहदारण्यकोपनिषद् स्तः।

मिथिलाक्षेत्रे याज्ञवल्क्यस्य आश्रमः अवर्तत। तत्र एषः विशालं गुरुकुलं सञ्चालयति स्म। राजर्षेः जनकस्य सभायां स्वर्णमण्डिताः गाः आश्रमं प्रति नयनाय एतेन आदिष्टः सामश्रवा अपि एतस्यैव गुरुकुलीनः छात्रः आसीत्। शास्त्रार्थे एतस्य विजयलाभानन्तरं शाकल्यादिमुनीनां शिष्याश्च अध्ययनार्थम् एतस्यैव गुरुकुले जग्मुः।

याज्ञवल्क्यस्य द्वे भार्ये आस्ताम्, ज्येष्ठा मैत्रेयी कनिष्ठा च कात्यायनी। ते गुणशालिन्यौ, सदाचारिण्यौ, पतिसेविन्यौ च आस्ताम्। द्वयोः एव उपरि याज्ञवल्क्यस्य समानः स्नेहः आसीत्। कात्यायनी सामान्या महिला आसीत् परन्तु मैत्रेयी विदुषी आसीत्। कात्यायनी स्वरूपसौन्दर्यार्थमपि ध्यानं ददाति स्म परन्तु तथाविधे सांसारिके विषये मैत्रेय्याः अनुरक्तिः



नासीत्। कात्यायन्याः शृङ्गारेण च तस्याम् ईर्ष्याभावः कदापि नोदेति स्म। कनिष्ठभगिनीम् इव सा कात्यायनीं स्निह्यति स्म।

गुरुकुलस्य सम्यक् सञ्चालनाय द्वयोरेव भार्ययोः साहाय्यं याज्ञवल्क्यः प्राप्नोति स्म। कात्यायनी विशेषतः गुरुकुले भोजनावासादिव्यवस्थाम् एवञ्च मैत्रेयी छात्राणां पाठनाभ्यासादिव्यवस्थां सम्पादयति स्म।

जीवनस्य अन्तिमे क्षणे यदा याज्ञवल्क्यः दायभागं विभज्य द्वाभ्यां भार्याभ्यां दातुम् ऐच्छत्, तदा कात्यायनी तत् स्वीचकार। अध्यात्मज्ञाननिष्ठा मैत्रेयी तदानीं भर्तारं प्रति पप्रच्छ– 'येनाहं नामृता स्याम्, किमहं तेन कुर्याम् ?' इति। येन धनेन अमृतत्वप्राप्तिः न भवति, तस्य किं प्रयोजनम् ?, इति कथयन्त्या तया धनस्वीकारः एव न कृतः। याज्ञवल्क्यः मैत्रेयीं तत्त्वज्ञानम् उपादिशत्। उपदेशं प्राप्य सा लब्धबोधा निर्भया च बभूव।

महर्षिणा एकः स्मृतिग्रन्थः विरचितः। तस्य नाम याज्ञवल्क्यस्मृतिः। इयं स्मृतिः विद्वत्समाजे अतीव प्रशंसिता, बहुसम्मानिता च वर्तते। एतावदेव न, अपितु शुक्लयजुर्वेदेन, शतपथब्राह्मणेन, याज्ञवल्क्यस्मृत्या सह अस्माभिः प्रतिज्ञासूत्रम्, बृहदारण्यकोपनिषद्, ईशावास्योपनिशद्, योगयाज्ञवल्क्यः चेति यानि ग्रन्थरत्नानि प्राप्तानि, तदर्थमपि याज्ञवल्क्यस्यैव महान् उपकारः वर्तते।

## अभ्यासः

### पाठानुशीलनम्

१. **शुद्धमुच्चारयत**

अध्यात्मवेत्ता, ब्रह्मविद्वरिष्ठः, प्रख्यातिङ्गता, बृहदारण्यकोपनिषद्, पाठनाभ्यासादिव्यवस्थाम्, अध्यात्मज्ञाननिष्ठा, याज्ञवल्क्यस्मृत्या

२. **शुद्धं कृत्वा लिखत**

शिस्येसु, मुर्तरूपेण, शुर्यदेवात्, गूणसालिन्यौ, महर्षीणा, प्रसंशिता

३. **पाठस्य तृतीयमनुच्छेदं शिक्षकात् श्रुत्वा लिखत ।**

४. **एकपदेन उत्तरयत**

(क) याज्ञवल्क्यस्य समयः क आसीत् ?

(ख) सूर्यदेवः केन रूपेण वेदम् उपादिशत् ?

(ग) याज्ञवल्क्यस्य कनिष्ठा पत्नी का ?

(घ) 'येनाहं नामृता स्याम्, किमहं तेन कुर्याम् ?' इति का उक्तवती ?

(ङ) महर्षिणा याज्ञवल्क्येन रचितस्य स्मृतिग्रन्थस्य किम् नाम ?

५. **सङ्क्षेपेण उत्तरयत**

(क) महर्षिः याज्ञवल्क्यः कुत्रत्यः आसीत् ?

(ख) याज्ञवल्क्यस्य पिता कः ?

(ग) याज्ञवल्क्यः शास्त्रार्थे कान् पराजयत् ?

(घ) सामश्रवा कस्य गुरुकुले अधीते स्म ?

(ङ) वैशम्पायनशिष्येषु कः सर्वोत्तमः आसीत् ?

(च) याज्ञवल्क्यस्य देवगुरुः कः ?

६. **अधः प्रदत्तानि कथनानि पाठाधारेण संशोध्य लिखत**

(क) याज्ञवल्क्यस्य पितुर्नाम ब्रह्मदत्तः आसीत् ।

(ख) मैत्रेयी सामान्या महिला आसीत् ।

(ग) राजर्षिः जनकः मिथिलाधिपतिः आसीत् ।

(घ) सामश्रवा याज्ञवल्क्यस्य पुत्रः आसीत् ।

(ङ) वैशम्पायनस्य रोषस्य कारणं याज्ञवल्क्यस्य मौनता आसीत् ।

(च) शतपथब्राह्मणः कृष्णयजुर्वेदाध्यायिनां ब्राह्मणग्रन्थः आसीत् ।

(छ) कात्यायन्याः शृङ्गारेण मैत्रेय्याम् ईर्ष्याभावः आसीत् ।

(ज) याज्ञवल्क्यः कात्यायनीं तत्त्वज्ञानम् उपादिशत् ।

७. **'महर्षिः याज्ञवल्क्यः' इति शीर्षके याज्ञवल्क्यपरिचयं स्वभाषया लिखत ।**

८. **पाठमाधृत्य समुचितेन पदेन रिक्तस्थानं पूरयत ।**

(क) याज्ञवल्क्यस्य द्वे भार्ये ............. ।

(ख) ते ............., सदाचारिण्यौ, ............ च आस्ताम् ।

(ग) द्वयोः एव ....... याज्ञवल्क्यस्य ....... स्नेहः ............ ।

(घ) ............. सामान्या ............. आसीत् ।

(ङ) मैत्रेयी विदुषी आसीत् ।

(च) ............ स्वरूपसौन्दर्यार्थमपि .......... ददाति स्म ।

(छ) सांसारिके ........... मैत्रेय्याः अनुरक्तिः नासीत् ।

(ज) ............ शृङ्गारेण मैत्रेय्याम् ईर्ष्याभावः नासीत् ।

(झ) .............. इव मैत्रेयी कात्यायनीं .......... स्म ।

(ञ) येनाहं ............. स्याम्, ............. तेन कुर्याम् ?

९. **पदावलीभिः क्रियायोगेन वाक्यानि संयोजयत**

| **'अ' खण्डः** | **'आ' खण्डः** |
|---|---|
| महर्षिणा एकः स्मृतिग्रन्थः | वर्तते । |
| तस्य किम् | नोचितम् । |
| मैत्रेयी याज्ञवल्क्यं प्रति | आसीत् । |
| याज्ञवल्क्येन सूर्यदेवात् विद्या | अवर्तत । |
| याज्ञवल्क्यस्य महान् उपकारः | विरचितः । |

| | |
|---|---|
| मानवगुरोः सकाशाद् विद्याग्रहणम् | प्रयोजनम् ? |
| याज्ञवल्क्यः वैशम्पायनस्य प्रियशिष्यः | चकार । |
| मिथिलाक्षेत्रे क्वचित् आश्रमः | अधीता । |

१०. **पदानि प्रयुज्य वाक्यानि रचयत**

गुरुकुलम्, अध्ययनार्थम्, वेदविद्या, ईर्ष्याभावः, अनुरक्तिः, आशा, प्रयोजनम्, उपादिशत्, विरचितः, ग्रन्थरत्नानि, उपरि, उदेति, मिथिलाक्षेत्रे, विदुषी, सर्वोत्तमः ।

११. **पठित्वा प्रश्नान् उत्तरयत**

पुरा मिथिलाधिपतिः जनकः महान्तं यज्ञं समपादयत् । यज्ञे कुरु-पाञ्चालादिस्थानेभ्योऽपि ऋत्विजः, विद्वांसः, मुनयश्च आमन्त्रिताः आसन् । सम्पन्ने यज्ञे सर्वेभ्यः ब्राह्मण-ऋत्विग्भ्यः प्रचुरदक्षिणादानानन्तरं राजर्षेः जनकस्य मनसि एका जिज्ञासा समुद्भूता । सः अचिन्तयत् यत्– 'बह्वीभ्यः दिग्भ्यः अत्र नैके विद्वांसः ब्राह्मणाः, तत्त्वचिन्तकाः मुनयश्च समागताः सन्ति । एतेषु ब्रह्मविद्वरिष्ठः कः भवेत् ?' इति ।

राजर्षिः जनकः स्वस्य जिज्ञासां शमयितुम् एकम् उपायम् अचिन्तमत् । स राजप्रासादस्य गोशालाप्रमुखम् आहूय आदिष्टवान् यत्– 'सहस्रं गाः स्नापयित्वा तच्छफशृङ्गाणि स्वर्णाभरणैः मण्डयित्वा यज्ञस्थलवर्तिन्याः राजसभायाः पुरतः आनय' इति । क्षणानन्तरं तत्र समानीतासु गोषु राजर्षिः जनकः समुदघोषयत् यत्– 'अत्र समुपस्थितेषु विद्वत्सु यः ब्रह्मविद्वरिष्ठः विद्वान् अस्ति, स इमाः स्वर्णमण्डिताः सहस्रं गाः नेतुं शक्नोति ।'

स्वर्णमण्डितानां गवां स्वीकरणेच्छा तु तत्रत्यानाम् अन्येषामपि आसीत् परन्तु सर्वेषां समक्षं स्वात्मानं ब्रह्मविद्वरिष्ठः विद्वान् अस्मीति भावयितुं साहसः नासीत् । क्षणं प्रसारितां स्तब्धतां निवारयन् महर्षिः याज्ञवल्क्यः स्वशिष्यं जगाद– 'सामश्रवः ! अस्मदीयम् आश्रमं प्रति नय इमाः गाः ।' याज्ञवल्क्यस्य तादृशीं धृष्टतां वीक्ष्य सर्वे आश्चर्यं प्रापुः । जनकस्य प्रधानः होता अश्वलः त्वरितम् उपसृत्य व्यङ्ग्यभावेन याज्ञवल्क्यम् अवदत्– 'त्वं नु खलु नो याज्ञवल्क्य ! ब्रह्मिष्ठोऽसि ?'

याज्ञवल्क्यः सारल्येन उदतरत्– 'नमो वयं ब्रह्मिष्ठाय कुर्मो गोकामा एव वयम् ।' ततः ब्रह्मनिष्ठाभिमानी अश्वलः शास्त्रार्थे याज्ञवल्क्यं पराजेतुं भृशं प्रयतितवान् ।

एवञ्च ऋतभागपुत्रः आर्तभागः, लाह्यपुत्रः भुज्युः, चक्रपुत्रः उषस्तः, कुशीतकपुत्रः कहोलः, अरुणपुत्रः उद्दालकः च नैकान् प्रश्नान् पप्रच्छुः । प्रतिप्रश्नं समुचितम् उत्तरं प्राप्य मौनमाश्रितेषु सर्वेषु पुनः वचक्नुपुत्री विदुषी गार्गी उपसृत्य पप्रच्छ । गार्गी च प्रश्नानुकूलं समाधानं श्रुत्वा याज्ञवल्क्यं प्रशंसितवती । अन्ते अतिप्रश्नं कुर्वन्तं शकलपुत्रं शाकल्यमेव याज्ञवल्क्यः प्रश्नं पप्रच्छ परन्तु शाकल्यः तस्य उत्तरं दातुं नाशक्नोत् । शास्त्रार्थे याज्ञवल्क्यः विजयी अभवत् । सर्वे देवरातपुत्रस्य याज्ञवल्क्यस्य जयकारं कुर्वन्तः राज्ञः स्वीकृतिम् अवाप्य स्वगृहाश्रमान् प्रति ययुः ।

(अ) **एकपदेन उत्तरयत**

(क) याज्ञवल्क्यस्य धृष्टतां वीक्ष्य के आश्चर्यं प्रापुः ?

(ख) कः याज्ञवल्क्यस्य प्रश्नस्य उत्तरं दातुं नाशक्नोत् ?

(आ) **पूर्णवाक्येन उत्तरयत**

(क) यज्ञे के आमन्त्रिताः आसन् ?

(ख) जनकः राजप्रासादस्य गोशालाप्रमुखम् आहूय किम् आदिशत् ?

(ग) गार्गी प्रश्नानुकूलं समाधानं श्रुत्वा किं कृतवती ?

(घ) सर्वे किं कुर्वन्तः स्वगृहाश्रमान् ययुः ?

(इ) कस्य पिता कः ?, इति मेलयत

| **खण्डः 'क'** | **खण्डः 'ख'** |
|---|---|
| उद्दालकस्य पिता | वचक्नुः |
| गार्ग्याः पिता | अरुणः |
| उषस्तस्य पिता | लाह्यः |
| आर्तभागस्य पिता | कुशीतकः |
| भुज्योः पिता | चक्रः |
| कहोलस्य पिता | ऋतभागः |
| शाकल्यस्य पिता | देवरातः |
| याज्ञवल्क्यस्य पिता | शकलः |

१२. **अधस्तनं गद्यं पठित्वा उत्तराणि लिखत**

ये लोकहिताय तपः कुर्वन्ति, परोपकारं विदधति, हितोपदेशान् च कुर्वन्ति ते एव मुनय उच्यन्ते । ज्ञानवन्तस्तपोनिष्ठाश्च महापुरुषा मुनिपदेन सम्बोध्यन्ते । ये महर्षयश्च महता तपोबलेन लोकानां कल्याणं कर्तुं समर्थाः च बभूवुस्ते एव ऋषयः उच्यन्ते । याज्ञवल्क्यः, वशिष्ठः, विश्वामित्रः, व्यासः, अत्रिः, गौतमः, पाणिनिः, कात्यायनः, पतञ्जलिश्चेत्यादयो महर्षयः प्रसिद्धाः सन्ति । ते एव पुराणानां धर्मशास्त्राणां व्याकरणस्य आयुर्वेदस्य योगशास्त्रस्य प्रणेतारः सन्ति, येषां माध्यमेन अधुनापर्यन्तं जनाः लाभान्विताः सन्ति । अधुना महर्षिभिः प्रणीतानां ग्रन्थानां अध्ययनम् अनुसन्धानं च विश्वस्य महत्सु विश्वविद्यालयेषु भवति । तेषां ज्ञानस्य गाम्भीर्यं बोद्धुं ख्यातनामानोऽपि वैज्ञानिका असमर्थाः सन्ति । तेषामेव सदाचारद्वारा आर्याणां संस्कृतिर्जगति प्रशस्यते । अतोऽस्माभिरपि महर्षीणामादरो विधेयः ।

**प्रश्नाः**

(क) कीदृशाः जनाः ऋषयः उच्यन्ते ?

(ख) महर्षयः के ?

(ग) प्रसिद्धानां महर्षीणां नामानि लिखत ।

(घ) केषां माध्यमेन जनाः लाभान्विताः सन्ति ?

(ङ) महत्सु विद्यालयेषु अधुना किं किं भवति ?

(च) आर्याणां संस्कृतिर्जगति केन कारणेन प्रशस्यते ?

## व्यवहारानुशीलनम्

१. **अभिभावकेभ्यः शिक्षकेभ्यो वा कस्यचन महर्षेः जीवनचरितं श्रुत्वा कक्षायां श्रावयत ।**

२. **महर्षिणा याज्ञवल्क्येन विहितानि ज्ञानवर्द्धकानि कार्याणि सूचीकृत्य कक्षायां प्रदर्शयत ।**

३. **युष्माकं समाजे कस्य वेदस्य (शुक्लयजुर्वेदस्य कृष्णयजुर्वेदस्य वा) पाठो जायते ? अनुसन्धाय कक्षायां विमर्शं कुरुत ।**

४. **सर्वोत्तमविकल्पं (✓) चिह्नेन दर्शयत**

(क) ज्ञानिनो जनस्य समीपे गत्वा त्वं किं कुरुषे ?

(अ) तस्य समीपम् एव न गच्छामि ।

(आ) ज्ञानं शुश्रूषामि ।

(इ) तस्य सेवां करिष्यामि ज्ञानं च आदास्यामि ।

(ई) तस्य तिरस्कारं करोमि ।

(ख) आर्जितस्य ज्ञानस्य उपयोगं त्वं किमर्थं करिष्यसि ?

(अ) लोकानां हिताय देशस्य विकासाय च ।

(आ) धनार्जनाय ।

(इ) अहङ्कारप्रदर्शनाय ।

(ई) विवादाय ।

(ग) त्वं विद्यार्जनाय शिल्पशिक्षायै वा किं करोषि ?

(अ) विशाले विद्यालये पठामि ।

(आ) सम्यक् पठामि, व्यवहारे च तस्य प्रयोगं करोमि ।

(इ) बहुभिः रूप्यकैः विद्यां क्रीणामि ।

(ई) अहं विद्यार्जनं कर्तुं नैव इच्छामि ।

(घ) कक्षायाम् अधीतानि ज्ञानानि किं करोषि ?

(अ) विस्मरामि ।

(आ) अभ्यासपुस्तिकासु विलिख्य स्थापयामि ।

(इ) प्रतिदिनं तेषां पाठं करोमि ।

(ई) तेषां चिन्तनं कृत्वा व्यवहारे उपयोगं करोमि ।

त्रयोदशः पाठः

# सद्भिः कुर्वीत सङ्गतिम्

**मलयाचलगन्धेन त्विन्धनं चन्दनायते ।**
**तथा सज्जनसङ्गेन दुर्जनः सज्जनायते ॥**

**पदच्छेदः–** मलयाचलगन्धेन, तु, इन्धनम्, चन्दनायते, तथा, सज्जनसङ्गेन, दुर्जनः, सज्जनायते ।

**अन्वयः–** (यथा) मलयाचलगन्धेन इन्धनं चन्दनायते तथा सज्जनसङ्गेन तु दुर्जनः सज्जनायते ।

**अर्थः–** यथा मलयाचलनामकस्य पर्वतस्य सम्पर्केण काष्ठे सुगन्ध आगच्छति अनन्तरं काष्ठस्य चन्दनरूपेण व्यवहारो भवति, तथैव सज्जनानां सम्पर्केण दुर्जनः सज्जनो भवति ।

**साधूनां दर्शनं पुण्यं तीर्थभूता हि साधवः ।**
**कालेन फलते तीर्थं सद्यः साधुसमागमः ॥**

**पदच्छेदः–** साधूनाम्, दर्शनम्, पुण्यम्, तीर्थभूताः, हि, साधवः, कालेन, फलते, तीर्थम्, सद्यः, साधुसमागमः ।

**अन्वयः–** साधूनां दर्शनं पुण्यम् (अस्ति) । हि साधवः तीर्थभूताः सन्ति । तीर्थं कालेन फलते, साधुसमागमः सद्यः (फलति) ।

**अर्थः–** सज्जनानां दर्शनेन पुण्यं लभ्यते । अर्थात् सज्जनैः सह सङ्गत्या पुण्यार्जनं भवति । यतः सज्जनाः तीर्थस्वरूपा भवन्ति । अतो यथा तीर्थाटनेन पुण्यं लभ्यते तथैव सज्जनानां दर्शनेन अपि पुण्यं लभ्यते । तीर्थाटनं तु बहुकालानन्तरं पुण्यफलं ददाति । सज्जनानां सङ्गतिस्तु

तत्कालमेव पुण्यफलं ददादि। अतः तीर्थाटनादपि सज्जनसङ्गत्या शीघ्रं पुण्यफलं प्राप्यत इत्याशय।

**अहो दुर्जनसंसर्गान्मानहानिः पदे पदे।**
**पावको लोहसङ्गेन मुद्गरैरभिहन्यते॥**

**पदच्छेदः-** अहो, दुर्जनसंसर्गात्, मानहानिः, पदे, पदे, पावकः, लोहसंगेन, मुद्गरैः, अभिहन्यते॥

**अन्वयः-** अहो ! दुर्जनसंसर्गात् पदे पदे मानहानिः (भवति)। लोहसङ्गेन पावको मुद्गरैः अभिहन्यते।

**अर्थः-** जना अग्निं पूजयन्ति परं लोहेन सह यदा अग्निः सम्पृक्तो भवति, तदा स एव अग्निः लोहकारेण मुद्गरैः ताड्यते। एवमेव दुष्टानां दुर्जनानां सम्पर्केण जनानां प्रतिपदं मानहानिः भवति।

**अणुरप्यसतां सङ्गः सद्गुणं हन्ति विस्तृतम्।**
**गुणरुपान्तरं याति तक्रयोगाद्यथा पयः॥**

**पदच्छेदः-** अणुः, अपि, असताम्, सङ्गः, सद्गुणम्, हन्ति, विस्तृतम्, गुणरूपान्तरम्, याति, तक्रयोगात्, यथा, पयः॥

**अन्वयः-** यथा तक्रयोगात् पयः गुणरूपान्तरं याति (तथा) अणुः अपि असतां सङ्गः विस्तृतं सद्गुणं हन्ति।

**अर्थः-** यथा स्वल्पस्य तक्रस्य सम्पर्केण दुग्धं स्वस्य स्वरूपं त्यक्त्वा दधिस्वरूपं गृह्णाति तथैव मनुष्ये वर्तमान ईषदपि मूर्खसङ्गजनितो दुर्गुणः तस्मिन् वर्तमानान् सर्वान् सद्गुणान् नाशयित्वा तं दुर्गुणमयं कारयति।

**सद्भिरेव सहासीत सद्भिः कुर्वीत सङ्गतिम्।**
**सद्भिर्विवादं मैत्रीं च नासद्भिः किञ्चिदाचरेत्॥**

**पदच्छेदः-** सद्भिः, एव, सह, आसीत, सद्भिः, कुर्वीत, संगतिम्, सद्भिः, विवादम्, मैत्रीम्, च, न, असद्भिः, किञ्चित्, आचरेत्॥

**अन्वयः-** सद्भिः सह एव आसीत। सद्भिः सङ्गतिं कुर्वीत। सद्भिः विवादं मैत्रीं च कुर्वीत। असद्भिः किञ्चिद् न आचरेत्।

**अर्थः-** मनुष्येण सज्जनैः सह एव उपवेशः कर्तव्यः । सज्जनानाम् एव संगतिः कर्तव्या । सज्जनैः सह एव मित्रता कार्या । विवादोऽपि सज्जनैः सह एव कर्तव्यः । दुर्जनैः सह तु मनुष्येण किमपि न कर्तव्यम् । दुर्जनैः सह व्यवहारेण मनुष्यो दुःखं प्राप्नोति ।

## शिक्षणालोकः

अस्य पाठस्य माध्यमेन छात्राः सत्सङ्गस्य महत्त्वविषये बोधनीयाः । दुर्जनसंसर्गेण दुर्गतिं प्राप्तानां जनानाम् उदाहरणेन सत्सङ्गार्थं छात्राः प्रेरणीयाः । शिक्षकेण सत्सङ्गस्य लाभविषयका, दुर्जनसङ्गस्य हानिविषयकाश्च अन्ये श्लोका अन्वेषणीयाः, ततः तेषां तात्पर्यविषये च छात्रा अवबोधनीयाः ।

## अभ्यासः

## पाठानुशीलनम्

१. **शुद्धम् उच्चारयत**

सज्जनसङ्गेन, तीर्थभूताः, मुद्गरैरभिहन्यते, गुणरूपान्तरम्, सद्भिःर्विवादः

२. **पाठस्थानां श्लोकानां श्रुतलेखनं कुरुत ।**

३. **एकपदेन उत्तरयत**

(क) केन दुर्जनः सज्जनायते ?

(ख) साधवः कीदृशाः ?

(ग) लोहसङ्गेन कः मुद्गरैरभिहन्यते ?

(घ) पयः कस्य सङ्गेन गुणरूपान्तरं याति ?

(ङ) केन सह विवादं मैत्रीं च कुर्यात् ?

४. **नेपाली भाषायामर्थं लिखत**

**साधूनां दर्शनं पुण्यं तीर्थभूता हि साधवः ।**

**कालेन फलते तीर्थं सद्यः साधुसमागमः ॥**

५. **सङ्क्षेपेण उत्तरयत**

(क) दुर्जनः कथं सज्जनो भवति ?

(ख) साधुसमागमेन किं भवति ?

(ग) मानहानेः कारणं किम् ? सोदाहरणं लिखत ।

(घ) असतां सङ्गेन सद्गुणः दुर्गुणः कथं भवति ?

(ङ) सद्भिः किं किं कुर्वीत ?

६. **'सद्भिः कुर्वीत सङ्गतिम्' इत्यस्य तात्पर्यं प्रकाशयत ।**

७. **वाक्येषु प्रयोगं कुरुत**

दुर्जनः, साधवः, पदे, पयः, आचरेत् ।

८. **परस्परं मेलयत**

| | |
|---|---|
| साधुदर्शनम् | कालेन फलते |
| साधवः | सद्यः फलति |
| तीर्थम् | पुण्यम् |
| साधुसङ्गमः | तीर्थभूताः |

९. **रिक्तस्थानं पूरयत**

(क) अग्निः लोहसङ्गात् ............ताड्यते । (चपेटैः, मुद्गरैः, दण्डैः)

(ख) दुर्जनसङ्गः.........सद्गुणं नाशयति । (विस्तृतम्, स्वल्पम्, एकम्)

(ग) ........ सह उपवेशः कार्यः । (पुरोहितैः, शिक्षकैः, सज्जनैः)

(घ) सज्जनैः सह.......कार्या । (मित्रता, वैरता, दुष्टता)

१०. **सत्यासत्यं विवेचयत**

(क) सज्जनः दुर्जनसङ्गेन दुर्जनायते ।

(ख) साधूनां दर्शनेन पुण्यं लभ्यते ।

(ग) सज्जनैः सह सङ्गतिः न कार्या ।

(घ) असद्भिः विवादोऽपि न करणीयः ।

११. **श्लोकयोः सरलार्थं पठित्वा प्रश्नान् उत्तरयत**

**दुर्जनेन समं वैरं प्रीतिं चापि न कारयेत् ।**
**उष्णो दहति चाङ्गारः शीतः कृष्णायते करम् ॥**
**गुणवद्वस्तुसंसर्गाद् याति स्वल्पोऽपि गौरवम् ।**
**पुष्पमालानुसङ्गेन सूत्रं शिरसि धार्यते ॥**

**सरलार्थः**

अस्माभिः दुर्जनेन सह वैरम् अपि नैव करणीयम्, मैत्री अपि नैव करणीया । उभयम् अपि हानिकारकम् एव भवति । अङ्गारः यदा उष्णो भवति तदा दहति, यदा च शीतो भवति तदा च करं कृष्णं कारयति ।

गुणवतः वस्तुनो यदि संसर्गो जायते तदा स्वल्पः अपि गौरवं याति । पुष्पाणाम् अनुसङ्गेन जनाः सूत्रम् अपि शिरसि धारयन्ति । अतः गुणवतः एव वस्तुनः संसर्गो विधेयः ।

(क) एकपदेन उत्तरयत

(अ) केन सह वैरं प्रीतिं वा न कारयेत् ?

(आ) उष्णः अङ्गारः किं करोति ?

(इ) अङ्गारः शीतः किं करोति ?

(ई) स्वल्पः गौरवं कथं याति ?

(उ) पुष्पमालानुसङ्गेन किं शिरसि धार्यते ?

(ख) पूर्णवाक्येन उत्तरयत

(अ) दुर्जनेन किं किं न कुर्यात् ?

(आ) गुणवतः वस्तुनः संसर्गेण किं भवति ?

(इ) सूत्रं केन कारणेन शिरसि धार्यते ?

(ई) अङ्गारः किं किं करोति ?

१२. **अधस्तनं पद्यं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि दत्त**

जाड्यं धियो हरति सिञ्चति वाचि सत्यम्,
मानोन्नतिं दिशति पापमपाकरोति ।

चेतः प्रसादयति दिक्षु तनोति कीर्तिम्,

सत्सङ्गतिः कथय किं न करोति पुंसाम् ॥

**प्रश्नाः**

(क) का बुद्धेर्जडतां विनाशयति ?

(ख) सत्सङ्गतिः कुत्र सत्यं क्षिपति ?

(ग) सत्सङ्गतिः किम् अपाकरोति ?

(घ) सत्सङ्गतिः कुत्र कीर्तिं विस्तारयति ?

(ङ) 'पुंसाम्' इत्यत्र विभक्तिवचननिर्देशं कुरुत ।

१३. **शिक्षकस्य साहाय्येन सरलार्थं प्रकाशयत**

**गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः ।**

**हसन्ति दुर्जनास्तत्र समादधति सज्जनाः ॥**

## व्यवहारानुशीलनम्

१. **'साधुसङ्गतिः' इति विषये एकं लघुनिबन्धं रचयत ।**

२. **दुर्जनसंसर्गात् कुमार्गे गता जनाः कथं सन्मार्गे आनेयाः ? कक्षायां परामर्शं कुरुत ।**

३. **सत्सङ्गस्य लाभप्रदर्शकम् एकं श्लोकम्, दुर्जनसङ्गस्य हानिप्रदर्शकमेकं श्लोकञ्च अन्विष्य तयोस्तात्पर्यं विशदीकुरुत ।**

४. **समुचितविकल्पे (✓) चिह्नं दर्शयत**

(क) त्वं कीदृशस्य मित्रस्य सङ्गतिं करोषि ?

(अ) यस्य पार्श्वे बहूनि रूप्यकाणि भवन्ति तस्य ।

(आ) यः अभिभानं कुरुते तस्य ।

(इ) यः चतुरः वर्तते किन्तु शीलवान् नास्ति तस्य ।

(ई) यः अन्येषां सहयोगं सम्मानं च कुरुते तस्य ।

(ख) तव सखा अस्वस्थः वर्तते चेत् त्वं किं कुरुषे ?

(अ) किमपि न करोमि ।

(आ) तं परित्यज्य अन्यत्र गच्छामि ।

(इ) चिकित्सालयं गन्तुं तस्य सहयोगं करोमि ।

(ई) स्वयमेव औषधमानीय ददामि ।

(ग) त्वं दूरदर्शने कीदृशान् कार्यक्रमान् पश्यसि ?

(अ) केवलं मनोरञ्जकान् ।

(आ) केवलं खेलस्य कार्यक्रमान् ।

(इ) भयकारकान् ।

(ई) ज्ञानवर्द्धकान्, मनोरञ्जकान् च ।

(घ) मार्गे याचकं दृष्ट्वा त्वं किं करोषि ?

(अ) तम् उपहसामि ।

(आ) तस्य सहयोगं कृत्वा खाद्यं वस्तु तस्मै ददामि ।

(इ) तस्य तिरस्कारं करोमि ।

(ई) तं तर्जयामि ।

## चतुर्दशः पाठः

# नापितस्य कथा

भारतस्य दक्षिणस्यां पाटलिपुत्रनामकम् एकं नगरम् आसीत् । तस्मिन् नगरे एकः मणिभद्रनामको धनिको वणिग् वसति स्म । पूर्वं तस्य पार्श्वे बहु धनम् आसीत् । सर्वे बान्धवाः तस्य सम्मानं कुर्वन्ति स्म । दुर्भाग्यवशात् तस्य सर्वं धनं क्रमेण नष्टम् अभवत् । बान्धवाः तं निर्धनं दृष्ट्वा उपहासं कर्तुम् आरब्धवन्तः । प्रतिदिनं ते तस्य अपमानं कुर्वन्ति स्म । बान्धावानाम् अपमानेन तस्य हृदयं खिन्नं भवति स्म ।

एकदा सः रात्रौ शयानः आसीत् । बान्धवानां अपमानयुतान् व्यवहारान् स्मारं स्मारं सः चिन्तितो बभूव । चिन्तितः सः उष्णं निःश्वसन् एकाकी विचारयामास- 'अहो ! धिग् इयं दरिद्रता । धिग् मम जीवनम् ।' सः गुरुभिः उपदिष्टं हितोपदेशं च सस्मार-

**नश्यति विपुलमतेरपि बुद्धिः पुरुषस्य मन्दविभवस्य ।**
**घृतलवणतैलतण्डुलवस्त्रेन्धनचिन्तया सततम् ॥**

'बुद्धिमान् अपि धनहीनो जनः समाजे तिरस्कृतः एव भवति । तस्य बुद्धिः केवलं भोजनवस्त्रादीनां चिन्तया एव विनश्यति । धनहीनस्य जनस्य जीवनं तु शिशिरम् इव परुषं भवति । सर्वे जनाः तम् उपेक्षन्ते । जनाः मनुजस्य कुलं, चरितं, विद्यां वा न पश्यन्ति । दुश्चरित्रो मूर्खो वापि जनो धनवान् वर्तते चेत् सः एव समाजे पूजितो भवति । विद्वांसोऽपि जनाः धनवतो जनस्य दासत्वं स्वीकुर्वन्ति ।' इत्थं विचारयन् सः पुनः चिन्तयामास- 'अनशनं विधाय अहं प्राणान् उत्सृजामि, अनेन धनहीनेनजीवनेन किम् ?' इति विचार्य चिन्ताकुलः सन् निद्रितोऽभवत् ।

निद्रितः सः स्वप्नं ददर्श । स्वप्ने कश्चन बौद्धभिक्षुस्तस्य पुरत उपस्थाय उक्तवान्, "भो श्रेष्ठिन् ! त्वं एतावता वैराग्यं न गच्छ । अहं पद्मनिधिः । तव पूर्वजाः कठोरतपस्यया मम आर्जनम् अकुर्वन् । अहम् अनेन एव रूपेण प्रातस्तव गृहमागमिष्यामि । तस्मिन् काले त्वं मम

शिरसि दण्डप्रहारं कुरु । अहं च कनकमयो भूत्वाऽक्षयो भविष्यामि ।"

मणिभद्रोऽपि प्रातः समुत्थाय स्वप्नं स्मरन् चिन्तयामास, "अहो ! रात्रौ मया दृष्टः स्वप्नः सत्योऽसत्यो वा भविष्यति, न ज्ञायते । नूनमयं स्वप्नः मिथ्या स्यात् । यतो हि अहं नित्यं धनस्यैव चिन्तनं करोमि ।" उक्तञ्च-

**व्याधितेन सशोकेन चिन्ताग्रस्तेन जन्तुना ।**
**कामार्तेनाऽथ मत्तेन दृष्टः स्वप्नो निरर्थकः ॥**

एतस्मिन् समये तस्य भार्या कञ्चन नापितं स्वस्य सेवायै आहूतवती । तस्मिन्नेव समये स्वप्ने दृष्टः भिक्षुः यथासमयं प्रादुर्बभूव । तं दृष्ट्वा प्रसन्नः सः तस्य निर्देशानुसारेण काष्ठदण्डेन तम् शिरस्यताडयत् । भिक्षुरपि सुवर्णमयः सन् तत्क्षणाद् भूमौ निपतितः । अथ सः श्रेष्ठी तं स्वगृहस्य अन्तःप्रकोष्ठे स्थापितवान् । किञ्चन सुवर्णं नापिताय दत्त्वा सोऽवदत्, "एतद् धनं मया दत्तानि वस्त्राणि च गृहाण, किन्तु त्वया यद् दृष्टम्, तद् गोपनीयं वृत्तान्तं न कुत्रचन आख्याहि ।"

नापितः तथेत्युक्त्वा गृहं गत्वा विचारयामास, "नूनं सर्वेऽपि भिक्षवः शिरसि ताडिताः सुवर्णमयाः भविष्यन्ति । तस्मादहमपि प्रातः प्रभूतान् भिक्षूनाहूय दण्डेन प्रहरिष्यामि । तेन प्रभूतं सुवर्णं मे भविष्यति । एवं चिन्तयन् नापितः महता कष्टेन तां निशां निनाय ।"

प्रातश्च समुत्थाय नापितः दण्डमेकं सज्जीकृत्य बौद्धविहारम् अगमत् । ततश्च जिनेन्द्रस्य समीपं गत्वा तस्य प्रदक्षिणत्रयं विधाय अवनितले जानुद्वयं न्यस्य तं प्रार्थयामास-

**जयन्ति ते जिना येषां केवलज्ञानशालिनाम् ।**
**आजन्मनः स्मरोत्पत्तौ मानसेनोषरायितम् ॥**

एवं संस्तुत्य प्राधनभिक्षोः समीपं गत्वा क्षितिनिहितजानुचरणः तस्य प्रार्थनाम् अकरोत् । भिक्षुरपि धर्मवृद्धेराशीर्वादं तस्य दत्तवान् । सोऽपि व्रतदीक्षामादाय उत्तरीयं गले निधाय उवाच, "भगवन् ! अद्य मम गृहे समेषां भिक्षूणां भोजनस्य प्रबन्धो भविष्यति । मम निमन्त्रणं स्वीकरोतु ।" प्रधानभिक्षुः उक्तवान्, "भो श्रावक ! धर्मज्ञोऽपि किम् एवं वदसि ? ब्राह्मणा एव निमन्त्रणं स्वीकृत्य तथा भक्तानां गृहे भोजनं कुर्वन्ति । वयं तु भिक्षवः भ्रमणकाले तत्कालमेव कस्यचन भक्तस्य श्रावकस्य गृहं गत्वा प्राणधारणाय भोजनं कुर्मः । तद् गम्यताम्, भूय एतादृशं प्रस्तावं मा कुरु ।"

तच्छ्रुत्वा नापित उक्तवान्, "अहं भवतां धर्मं वेद्मि । किन्तु बहवः श्रावकाः भवत आह्वयन्ति । साम्प्रतं मया पुस्तकाच्छादनयोग्यानि बहूनि कर्पटानि निर्मितानि सन्ति। तथैव पुस्तकानां लेखनाय बहु वित्तं सञ्चितमस्ति । अतः यथाकालमेव कार्यं सर्वमिति निवेदयामि ।"

ततो नापितः स्वगृहं गत्वा खादिरमयं दण्डं सज्जीकृत्य द्वारं पिधाय सार्द्धैकप्रहरस्य पश्चात् बौद्धविहारं गतवान् । तत्र द्वारि स्थितः विहारान् निष्क्रामतः भिक्षून् गुरुप्रार्थनया निमन्त्रयामास । ते सर्वेऽपि कर्पटस्य वित्तस्य च लोभेन अन्यान् परिचितान् श्रावकान् विहाय नापितस्य गृहं अगच्छन् । उक्तं च-

**एकाकी गृहसन्त्यक्तः पाणिपात्रो दिगम्बरः ।**
**सोऽपि संवाह्यते लोके तृष्णया पश्य कौतुकम् ॥**
**जीर्यन्ते जीर्यतः केशाः दन्ताः जीर्यन्ति जीर्यतः ।**
**चक्षुःश्रोत्रौ च जीर्येते तृष्णैका तरुणायते ॥**

नापितः तान् सर्वान् गृहे प्रवेश्य, द्वारं सम्यक् पिधाय लगुडप्रहारैः शिरस्यताडयत्। ते पि दण्डप्रहारेण केचन मृताः, केचन च भिन्नमस्तकाः पीडया क्रन्दितुमारभन्त। तेषां क्रन्दनमाकर्ण्य नगरस्य सुरक्षाप्रमुख प्रहरिण उक्तवान्, "भो भो ! किमयं कोलाहलो नगरमध्ये ? तद्गम्यताम्।" प्रहरिणोऽपि वेगान्नापितस्य गृहं गत्वा रुधिराप्लावितदेहान् पलायमानान् नग्नकान् अपश्यन्। पृष्टाश्च ते सर्वं वृत्तान्तम् अवदन्। तच्छ्रुत्वा सुरक्षाधिकारिणः नापितं बद्ध्वा धर्माधिष्ठानम् अनयन्। धर्माधिष्ठाने च धर्माधिकारी नापितं पृष्टवान्, "भो ! किमेतत् कुकृत्यं भवतानुष्ठितम् ?"

स च नापितः मणिभद्रस्य गृहे दृष्टं सर्वमपि वृत्तान्तं यथादृष्टम् अकथयत्। ततः ते श्रेष्ठिनं मणिभद्रमाहूय उक्तवन्तः, "भो श्रेष्ठिन् ! किं त्वया कश्चित्क्षपणको व्यापादितः ?" ततः सोऽपि सर्वं क्षपणकवृत्तान्तं निवेदयामास। अथ तैरभिहितम्, "अहो ! कुपरीक्षितकारी एषः नापितः शूलम् आरोप्यताम्" इति। अत उच्यते,

**कुदृष्टं कुपरिज्ञातं कुश्रुतं कुपरीक्षितम् ।**
**तन्नरेण न कर्तव्यं नापितेनात्र यत् कृतम् ॥**

## अभ्यासः

### पाठानुशीलनम्

१. **पाठस्थानि पद्यानि लयपूर्वकम् उच्चारयत, तेषामर्थस्य च परामर्शं कुरुत ।**

२. **अधस्तनान् शब्दान् शुद्धम् उच्चारयत**

पाटलिपुत्रनामकम्, आरब्धवन्तः, मन्दविभवस्य, दुश्चरित्र, बौद्धभिक्षुः, प्रादुर्बभूव, प्रधानभिक्षुः, रुधिराप्लावितदेहान्

३. **एकपदेन उत्तरयत**

(क) वणिक् कस्मिन् नगरे वसति स्म ?

(ख) कीदृशो जनः समाजे तिरस्कृतो भवति ?

(ग) निद्रितः मणिभद्रः किम् अपश्यत् ?

(घ) मत्तेन दृष्टः स्वप्नः कीदृशो भवति ?

(ङ) नापितः दण्डं सज्जीकृत्य कुत्र अगच्छत् ?

(च) के निमन्त्रणां स्वीकृत्य भक्तानां गृहे भोजनं कुर्वन्ति ?

(छ) सुरक्षाधिकारिणः नापितं कुत्र अनयन् ?

(ज) कुपरीक्षितकारी नापितः कुत्र आरोपितः ?

४. **एकवाक्येन उत्तरयत**

(क) मणिभद्रस्य सम्मानं के कुर्वन्ति स्म ?

(ख) कीदृशस्य पुरुषस्य बुद्धिः घृतादिचिन्तया नश्यति ?

(ग) धनहीनस्य जनस्य जीवनं कीदृशं भवति ?

(घ) मणिभद्रस्य भार्या सेवायै कम् आहूतवती ?

(ङ) नापिताय प्रधानभिक्षुः कीदृशम् आशीर्वादं दत्तवान् ?

(च) नापितेन सज्जीकृतं दण्डं केन काष्ठेन निर्मितम् आसीत् ?

(छ) दण्डप्रहारेण भिन्नमस्तकाः भिक्षवः किं कर्तुम् आरब्धवन्तः ?

५. **असमीचीनानि वाक्यानि समीचीनानि कुरुत**

(क) मणिभद्रः धनिको नासीत् ।

(ख) बान्धवाः मणिभद्रस्य सम्मानं कर्तुम् आरब्धवन्तः ।

(ग) धनवान् बुद्धिहीनो जनः समाजे तिरस्कृतो भवति ।

(घ) दण्डप्रहारेण भिक्षवः प्रसन्नाः सञ्जाताः ।

६. **कस्य कथनम् ? लिखत**

(क) अहो ! धिग् इयं दरिद्रता । धिग् मम जीवनम् ।

(ख) नूनं सर्वेऽपि भिक्षवः शिरसि ताडिताः सुवर्णमयाः भविष्यन्ति ।

(ग) भो श्रावक ! धर्मज्ञोऽपि किम् एवं वदसि ?

(घ) भो भो ! किमयं कोलाहलो नगरमध्ये ? तद्गम्यताम् ।

(ङ) भो श्रेष्ठिन् ! किं त्वया कश्चित्क्षपणको व्यापादितः ?

७. **पाठस्य अन्तिमानुच्छेदस्य श्रुतलेखनं कुरुत ।**

८. **अधस्तनम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरयत**

धनं जीवने अतीव महत्त्वपूर्णं भवति । धनेन विना मानवानां दैनन्दिनी नैव प्रचलति । केचन जनाः धनं स्नेहेन प्रेम्णा तुल्यं नास्तीति वदन्ति, परं धनस्य प्रेम्णः वा परस्परं तुलना नैव सम्भवति । यत्र प्रेम आवश्यकं भवति तत्र धनेन कार्यं न चलति । यत्र च धनम् आवश्यकं भवति तत्र प्रेम्णा व्यवहारो न भवति । धनस्य प्रेम्णश्च जीवने आवश्यकता दृश्यते, किन्तु एतयोः पृथग् महत्ता दृश्यते । धनेन विना मनुजस्य जीवने शान्तिर्नैव जायते । धनेन एव शान्तिर्मिलति इत्यपि न, किन्तु व्यवहारस्य परिचालनाय धनम् एव सहयोगि भवति । तेन विनास्माकं जीवनं दुःखितं भवति ।

**प्रश्नाः**

(क) धनेन विना किं नैव प्रचलति ?

(ख) कयोः परस्परं तुलना नैव सम्भवति ?

(ग) धनेन विना मानवजीवने किं नैव जायते ?

(घ) धनस्य महत्त्वम् इति विषये द्वे वाक्ये लिखत ।

९. **अधस्तनीं कथां संवादं च पठित्वा उत्तराणि लिखत**

बुद्धस्य कश्चन शिष्यो भिक्षुः एकवारं बुद्धस्य समीपमागत्य उक्तवान्, "तथागत ! किञ्चन निवेदनीयम् अस्ति ।" बुद्धः स्मितेन अवोचत्, "किं ते निवेदनम् ? ब्रूहि ।" भिक्षुरवोचत्, "मम वस्त्राणि पुरातनानि जातानि वर्तन्ते, धारणाय उचितानि न सन्ति । मत्कृते नवीनानि वस्त्राणि ददातु भवान् ।" भिक्षोरनुरोधं श्रुत्वा बुद्धस्तस्य वस्त्राणि अपश्यत्, तानि सत्यमेव जीर्णानि आसन् । अतस्तस्मै नवीनानि वस्त्राणि दातुं बुद्धोऽन्यम् अनुयायिनम् आदिशत् ।

केभ्यश्चन दिवसेभ्यः पश्चाद् बुद्धस्तस्य भिक्षोः कुटीरे अगमत् ।

बुद्धः - किं नवीनानि वस्त्राणि सन्धार्य त्वं सुखेन वर्तसे ? अन्यत् किमपि आवश्यकं किल ?

शिष्यः - धन्योऽस्मि प्रभो ! अहम् सुखेन वर्ते । नान्यत् किमपि मत्कृते आवश्यकम् ।

बुद्धः - तव पार्श्वे त्वधुना नवीनानि वस्त्राणि वर्तन्ते । पुराणानि वस्त्राणि कुत्र क्षिप्तवान् त्वम् ?

शिष्यः - नहि नहि, मम पार्श्वे एव सन्ति । अहं शयनकाले आच्छादनरूपेण तेषां प्रयोगं विदधामि ।

बुद्धः - पुराणानां आस्तरणानां किं विहितवान् ?

शिष्यः - वातायने जवनिकारूपेण तेषां प्रयोगं विदधे प्रभो !

बुद्धः - पुराणाः जवनिकाः क्व गतास्तर्हि ?

शिष्यः - चतुर्षु भागेषु तद् विभज्य महानसे तप्तभाण्डानाम् उत्तारणाय तेषां प्रयोगं विदधानोऽस्मि ।

बुद्धः - पूर्वं तत्र प्रयुज्यमानानां वस्त्राणां त्वं किम् अकार्षीः ?

शिष्यः - भूमिप्रोञ्छनीरूपेण तेषां प्रयोगो जायमानोऽस्ति ।

बुद्धः - पूर्वतनी प्रोञ्छनी क्व क्षिप्ता तर्हि ?

शिष्यः - प्रोञ्छन्याः वस्त्रम् अतीव जीर्णं शीर्णं च जातम् आसीत् । अतस्तस्य प्रयोगः असम्भव इव आसीत् । अतस्तस्य वस्त्रस्य तन्तून् पृथक्कृत्य सम्यक् प्रक्षाल्य ताभिः वर्त्तिकाः विहितवान् । ताभ्य एवैका वर्त्तिका ह्यो भवतां कक्षे प्रज्वालिताऽसीत् ।

बुद्धः - शिष्यस्य वार्तां श्रुत्वा अत्यन्तं प्रसन्नो बभूव । स वस्तूनां दुरुपयोगं न करोति स्म । जीर्णानामपि वस्तूनां सम्यग् उपयोगं कुरुते स्म ।

अधुना प्राकृतिकानि संसाधनानि क्षीयमाणानि वर्तन्ते। एतावता एवास्माभिरपि वस्तूनां पुनरुपयोगः करणीयः।

(क) एकपदेन उत्तरयत

(अ) बुद्धस्य शिष्यस्य कृते किम् आवश्यकम् ?

(आ) बुद्धः नवीनानि वस्त्राणि दातुं कम् आदिशत् ?

(इ) नवीनानि वस्त्राणि सन्धार्य शिष्यः सुखेन वर्तते, न वा ?

(ई) बुद्धः शिष्यस्य वार्तया कीदृशो बभूव ?

(ख) एकवाक्येन उत्तरयत

(अ) शिष्यः बुद्धस्य समीपे किं निवेदितवान् ?

(आ) पुराणाः जवनिकाः क्व गताः ?

(इ) वर्त्तिकानां निर्माणाय कस्य प्रयोगो विहितः ?

(ई) अधुना किं क्षीयमाणं वर्तते ?

(ग) वस्तूनां पुनःप्रयोगस्य आवश्यकताया विषये अनुच्छेदमेकं लिखत।

१०. **अधस्तनानि पदानि प्रयुज्य वाक्यानि रचयत**

तिरस्कृतः, दुश्चरित्र, पूर्वजाः, गृहाण, प्रभूतम्, निधाय, आह्वयन्ति, नापितः

११. **अधोलिखितं श्लोकद्वयं पठित्वा शिक्षकस्य साहाय्येन भावार्थं लिखत**

अस्माभिः विचार्य एव कार्याणि सम्पादनीयानि। सहसा कार्यं नैव करणीयम्। सहसा कृतं कार्यं कदाचन विनाशकारि भवति। दुःखदायि च भवति। अत एव उच्यते

भये वा यदि वा हर्षे सम्प्राप्ते यो विमर्शयेत्।
कृत्यं न कुरुते वेगान् न स सन्तापमाप्नुयात्॥
सहसा विदधीत न क्रियाम्, अविवेकः परमापदां पदम्।
वृणुते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः॥

## व्यवहारानुशीलनम्

१. **अविचार्य कार्यकरणेन तव जीवने कदाचन समस्या जाता वर्तते न वा ? तादृशं प्रसङ्गं संस्मृत्य कक्षायां श्रावयत।**

२. **काञ्चन पूर्वश्रुतां नीतिकथां कक्षायां श्रावयत ।**

३. **समुचितविकल्पे (✓) चिह्नं दत्त**

(क) कक्षायां रूप्यकाणि पतितानि दृष्ट्वा त्वं किं करोषि ?

(अ) उत्थाप्य तूष्णीं स्थापयामि ।

(आ) कस्य रूप्यकाणीति अन्विष्य तस्मै दास्यामि ।

(इ) नैव गृह्णामि ।

(ई) गृहीत्वा बहिर्गत्वा मिष्टान्नं खादामि ।

(ख) अवकाशस्य दिने मार्गे शिक्षकं दृष्ट्वा त्वं किं करोषि ?

(अ) किमपि नैव करोमि ।

(आ) नमस्करोमि ।

(इ) शीघ्रं धावामि ।

(ई) हसामि ।

(ग) सखीनां कलहं दृष्ट्वा त्वं किं करोषि ?

(अ) दूरे स्थित्वा पश्यामि ।

(आ) कलहाय उत्साहं वर्धयामि ।

(इ) मान्यजनानां साहाय्येन कलहम् अवरोधयामि ।

(ई) अहमपि कलहे संलग्नो भवामि ।

(घ) कस्मिन्नपि कार्ये असफलो भवसि चेत् किं करोषि ?

(अ) अधिकं प्रयत्नं करोमि ।

(आ) क्रोधं करोमि ।

(इ) शोकमग्नो भवामि ।

(ई) पुनः कार्यं न करोमि ।

पञ्चदशः पाठः

# उद्यममहत्त्वम्

**न दैवमिति सञ्चिन्त्य त्यजेदुद्योगमात्मनः ।**
**अनुद्योगेन कस्तैलं तिलेभ्यः प्राप्तुमर्हति ॥**

**पदच्छेदः–** न, दैवम्, इति, सञ्चिन्त्य, त्यजेद्, उद्योगम्, आत्मनः, अनुद्योगेन, कः, तैलं, तिलेभ्यः, प्राप्तुम्, अर्हति ।

**अन्वयः–** दैवम् इति सञ्चिन्त्य आत्मनः उद्योगं न त्यजेत् । कः अनुद्योगेन तिलेभ्यः तैलं प्राप्तुम् अर्हति ?

**अर्थः–** 'भाग्यम् अस्ति चेत् सर्वं प्राप्यते, भाग्यं नास्ति चेत् किमपि न प्राप्यते' इति विचार्य कोऽपि जनः स्वस्य उद्योगं परित्यजति चेत् स महद् दुःखं प्राप्नोति, यतः तिलेषु व्याप्तम् अपि तैलम् उद्योगेन विना प्राप्तुं न शक्यते । तिलेभ्यः तैलं निष्काशयितुम् अपि उद्योगः आवश्यक एव ।

**विहाय पौरूषं यो हि दैवमेवावलम्बते ।**
**प्रासादसिंहवत् तस्य मूर्ध्नि तिष्ठन्ति वायसाः ॥**

**पदच्छेदः –** विहाय, पौरुषम्, यः, हि, दैवम्, एव, अवलम्बते, प्रासादसिंहवत्, तस्य, मूर्ध्नि, तिष्ठन्ति, वायसाः ।

**अन्वयः –** यः पौरुषं विहाय दैवम् एव अवलम्बते, हि प्रासादसिंहवत् तस्य मूर्ध्नि वायसाः तिष्ठन्ति ।

**अर्थः –** यः मनुष्यः उद्योगं परित्यज्य केवलं भाग्यस्यैव अवलम्बनं करोति । तस्य दशा प्रसदस्थसिंह इव भवति । यथा प्रासादे वर्तमानः मूर्तिरूपः सिंहः स्वानुकूलं किमपि कर्तुं न शक्नोति, तथैव स

मनुष्यः अपि स्वानुकूलं किमपि कर्तुं न शक्नोति । यथा तस्य सिंहस्य शिरसि काकादयः पक्षिणः आगत्य निवसन्ति, तथैव तस्य मनुष्यस्य शिरसि अपि कीटादय आगत्य निवसन्ति ।

**गच्छन् पिपीलको याति योजनानां शतान्यपि ।**
**अगच्छन् वैनतेयोऽपि पदमेकं न गच्छति ॥**

**पदच्छेदः –** गच्छन्, पिपीलकः, याति, योजनानाम्, शतानि, अपि, अगच्छन्, वैनतेयः, अपि पदम्, एकम्, न, गच्छति ।

**अन्वयः –** गच्छन् पिपीलकः योजनानां शतानि अपि याति । अगच्छन् वैनतेयः एकं पदम् अपि न गच्छति ।

**अर्थः –** स्वल्पगतियुक्तः पिपीलकः अपि अनवरतं गच्छति चेत् शतं योजनानि गन्तुं शक्नोति । तीव्रगतियुक्तः गरुडः अपि एकस्मिन् एव स्थाने तिष्ठति, गमनाय उद्योगं न करोति चेत् एकं पदम् अपि गन्तुं न शक्नोति । अतः क्षमः अपि जनः उद्योगं विना किमपि कार्यं कर्तुम् न प्रभवति ।

**काममपि श्रियमासाद्य यस्तद्वृद्धौ न चेष्टते ।**
**तस्यायतिषु न श्रेयो बीजभोजिकुटुम्बवत् ॥**

**पदच्छेदः –** कामम्, अपि, श्रियम्, आसाद्य, यः, तद्वृद्धौ, न, चेष्टते, तस्य, आयतिषु, न, श्रेयः, बीजभोजिकुटुम्बवत् ।

**अन्वयः –** यः कामम् अपि श्रियम् आसाद्य तद्वृद्धौ न चेष्टते, बीजभोजिकुटुम्बवत् तस्य आयतिषु श्रेयः न भवति ।

**अर्थः –** धनं प्राप्य जनैः तस्य वृद्धौ उद्योगः करणीयः । यः धनं लब्ध्वा तस्य वृद्धौ प्रयासं न करोति, केवलं तस्य उपभोगमेव करोति, तस्य गृहेषु बीजभोजिनां जनानां गृहे इव कदापि कल्याणं न भवति । अर्थात् अपरवर्षस्य कृते बीजं न संस्थप्य यः सर्वमेव अन्नम् भुङ्क्ते, तस्य गृहे अपरवर्षे अन्नाभावो भवति, तथैव प्राप्तस्य धनस्य वृद्धौ प्रयासं न कृत्वा यः सर्वं धनम् उपयुज्य समाप्नोति, स अपि धनसमाप्तेः अनन्तरं दरिद्रो भवति ।

**काकतालीयवत्प्राप्तं दृष्ट्वापि निधिमग्रतः ।**
**न स्वयं दैवमादत्ते पुरुषार्थमपेक्षते ॥**

**पदच्छेदः–** काकतालीयवत्, प्राप्तम्, दृष्ट्वा, अपि, निधिम्, अग्रतः, न, स्वयम्, दैवम्, आदत्ते, पुरुषार्थम्, अपेक्षते ।

**अन्वयः–** कातालीयवत् प्राप्तं निधिम् अग्रतः दृष्ट्वा अपि दैवं स्वयं न आदत्ते, पुरुषार्थम् अपेक्षते ।

**अर्थः–** काकतालीयरूपेण अकस्मात् प्राप्तस्य धनस्य अपि ग्रहणं भाग्यं स्वयमेव न करोति । तस्य ग्रहणाय अपि पुरुषार्थ आवश्यको भवति । अर्थात् कोऽपि जनः स्वस्य अग्रे भाग्यवशात् अकस्मात् अधिकं धनं पश्यति, परं 'भाग्येन प्राप्तम्' इति विचार्य तस्य ग्रहणे उद्योगं न करोति चेत् तद् धनं तस्य अग्रत एव अन्यः नयति । स किमपि न प्राप्नोति । अतः भाग्येन प्राप्तस्य वस्तुनः उपभोगाय अपि उद्योगः आवश्यकः भवति ।

## शिक्षणालोकः

अनेन पाठेन छात्रा उद्यमस्य महत्त्वविषये बोधनीयाः । 'परिश्रमाश्रिताः जनाः सुखं लभन्ते, भाग्याश्रिताः जनाः दुःखं लभन्ते, अतः सर्वदा परिश्रमः कार्यः' इति छात्राणां मनसि चेतना आनेया । शिक्षकेण उद्यमविषयकाः अन्येऽपि श्लोका अन्वेषणीयाः, अनन्तरं तेषां तात्पर्यविषये छात्रा अवबोधनीयाश्च ।

## अभ्यासः

## पाठानुशीलनम्

१. **शुद्धम् उच्चारयत**

सञ्चिन्त्य, अनुद्योगेन, मूर्ध्नि, वैनतेयोऽपि, श्रियमासाद्य, दृष्ट्वापि

२. **पाठस्थान् श्लोकान् लयपूर्वकं पठत ।**

३. **कयोश्चन द्वयोः श्लोकयोः अनुलेखनं कुरुत ।**

४. **एकपदेन उत्तरयत**

(क) जनः दैवमिति सञ्चिन्त्य किं न त्यजेत् ?

(ख) गच्छन् कः योजनानां शतानि याति ?

(ग) चेष्टारहितस्य पुरुषस्य आयतिषु श्रेयो भवति न वा ?

(घ) निधेः प्राप्त्यर्थं किम् अपेक्षते ?

५. **एकवाक्येन उत्तरयत**

(क) केन तिलेभ्यः तैलमपि न लभ्यते ?

(ख) कस्य शिरसि वायसाः तिष्ठन्ति ?

(ग) किं विचार्य आत्मनः उद्योगः न त्याज्यः ?

(घ) कीदृशः वैनतेयः पदमेकं न गच्छति ?

(ङ) कस्य गृहे श्रेयो न भवति ?

(च) दैवं कीदृशं निधिम् अपि स्वयं न गृह्णाति ?

६. **पिपीलकस्य वैनतेयस्य च उदाहरणेन उद्यमस्य महत्त्वं प्रतिपादयत ।**

७. **पदानि संशोध्य लिखत**

ऊद्योगम्, सतान्यपि, बैनतेयः, आयतिसु, दृस्ट्वापि

८. **परस्परं मेलयत**

| | |
|---|---|
| उद्योगः | अगच्छन् |
| पौरुषम् | वैनतेयः |
| गच्छन् | अनुद्योगः |
| पिपीलकः | दैवम् |

९. **अधस्तनीं लघुकथां पठित्वा उत्तराणि लिखत**

कस्मिंश्चन वने पिपीलिकानां समूहो निवसति स्म । तत्रैव एकः अलसः शलभो निवसति स्म । शीतस्य याम आसीत् । पिपीलिकाः सूर्यस्य किरणेषु स्थित्वा ग्रीष्मकाले सञ्चितं खाद्यं आनन्देन भुञ्जाना आसन् । तस्मिन्नेव समये शलभस्तेषां समीपे सम्प्राप्तः । स उक्तवान्, "अहमपि अतीव बुभुक्षितोऽस्मि, ग्रासमेकं भोज्यं मम कृते ददत ।"

शलभस्य वचनं श्रुत्वा पिपीलिकाश्चकिताः सञ्जाताः । ता अवदन्, "रे ! त्वं शीतयामस्य कृते न किमपि सञ्चिवान् किमु ? ग्रीष्मकालं यावत् त्वं किं कृत्वा दिनानि यापितवान् ?"

"अहं सङ्गीताभ्यासे मग्न आसम् । यदाहं अन्नानां सञ्चयाय विचारं विहितवान्, तदा ग्रीष्मः गत आसीत् ।" शलभ उत्तरितवान् ।

पिपीलिकाः आश्चर्येण जुगुप्सया च तं अपश्यन् । तस्य सङ्गीताभ्यासस्य वार्तायाश्चोपहासं अकुर्वन् । ते अवदन्, "ग्रीष्मकालं यावत् त्वया सङ्गीताभ्यासो विहितः, तर्हि अधुना नृत्यं कुरु ।" एतदुक्त्वा पिपीलिकाः स्वकीयानि कार्याणि कर्तुं अगच्छन् ।

**(क) एकपदेन उत्तरयत**

(अ) शलभः कीदृश आसीत् ?

(आ) पिपीलिकाभिः कस्मिन् काले खाद्यं सञ्चितम् आसीत् ?

(इ) ग्रीष्मकाले शलभः कस्मिन् कार्ये मग्नोऽभवत् ?

**(ख) एकवाक्येन उत्तरयत**

(अ) पिपीलिकाः किं कुर्वाणा आसन् ?

(आ) शलभः पिपीलिकानां समीपं गत्वा किम् उक्तवान् ?

(इ) सङ्गीताभ्यासस्य वार्तां श्रुत्वा पिपीलिकाः किम् अकुर्वन् ?

(ई) शलभः किमर्थं पिपीलिकाभिः तिरस्कृतः ? विमृश्य लिखत ।

**१०. रिक्तस्थानं पूरयत**

(क) अलसाः ........... अवलम्बन्ते । (दैवम्, उद्योगम्, पुरुषार्थम्

(ख) ............. पिपीलकः शतं योजनानि गच्छति । (अगच्छन्, तिष्ठन्, गच्छन्)

(ग) प्राप्तस्य धनस्य ....... प्रयासः कर्तव्यः । (क्षये, वृद्धौ, विनाशे)

(घ) जनैः ............ न त्याज्यः ( उद्योगः, लोभः, असन्तोषः)

**११. समीचीनकथने 'आम्' असमीचीने च 'नहि' इति लिखत**

(क) जनैः पुरुषार्थः त्याज्यः ।

(ख) तिलेभ्यः तैलम् उद्योगेन लभ्यते ।

(ग) यः श्रियो वृद्धौ चेष्टते तस्य श्रेयो भवति ।

(घ) काकतालीयवत्प्राप्तं धनं दैवं गृह्णाति ।

**१२. वाक्येषु प्रयोगं कुरुत**

अवलम्बते, पिपीलकः, श्रेयः, अपेक्षते, तैलम्

१३. **अनुच्छेदं पठित्वा उत्तराणि लिखत**

आलस्यं मनुष्याणां जीवनस्य शत्रुः वर्तते । यः आलस्यं करोति, कार्यं च न कुरुते स जनो जीवने किमपि न लभते । अस्माकं समाजे बहुविधाः मानवाः दृश्यन्ते । केचन सफलाः सन्ति चेत् केचन निष्फलाः । परिश्रमिणः सर्वे साफल्यमेव लभन्ते इति निश्चयेन वक्तुं नैव शक्यते, किन्तु अलसः किमपि लब्धुं न शक्नोति इति निश्चितमेव । केचन जनाः दैवेन यद् दत्तं तदेव लभ्यते इति मत्त्वा कार्याणि अकृत्वा तिष्ठन्ति । किन्तु अस्माकं समाजे प्रसिद्धा उक्तिर्वर्तते, 'मम भाग्यं सुष्ठु वर्तते इति छिद्रबहुले पात्रे दुग्धदोहनम् नोचितम्' इति । अलसा जनाः रोगिणोऽपि भवन्ति । हितोपदेशान् श्रुत्वापि तेषामुपयोगाय ते चेष्टां न कुर्वन्ति । तादृशानां जनानां जीवने परिवर्तनं कदापि न सम्भवति । अत एव आलस्यं सर्वदा त्याज्यम् । परिश्रमेण जीवनस्य निर्वाहः करणीयः ।

**प्रश्नाः**

(क) मनुष्याणां शत्रुः कः वर्तते ?

(ख) समाजे दृष्टाः मानवाः कीदृशाः भवन्ति ?

(ग) किं निश्चयेन वक्तुं न शक्यते, किं च शक्यते ?

(घ) समाजे कीदृशी उक्तिः प्रसिद्धा वर्तते ?

(ङ) अस्माभिः किं त्याज्यम् ? किं च ग्राह्यम् ?

१४. **अधस्तनं पद्यं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि दत्त**

**उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः, दैवेन देयमिति कापुरुषा वदन्ति ।**
**दैवं निहत्य कुरु पौरुषमात्मशक्त्या, यत्ने कृते यदि न सिध्यति कोऽत्र दोषः ॥**

**प्रश्नाः**

(क) लक्ष्मीः कीदृशं पुरुषम् उपैति ?

(ख) कापुरुषाः किं वदन्ति ?

(ग) पौरुषं कया कर्तव्यम् ?

(घ) कुत्र दोषः अन्वेष्टव्यः ?

(ङ) 'निहत्य' इति पदस्यार्थं प्रकाशयत ।

## व्यवहारानुशीलनम्

१. **छात्रैः विद्यार्जने कीदृश उद्योगः कर्तव्यः ? परस्परं विमृशत ।**

२. **उद्योगस्य महत्त्वप्रतिपादकौ अन्यौ द्वौ श्लोकौ अन्विष्य तयोः तात्पर्यं प्रकाशयत ।**

३. **पुरुषार्थस्य भाग्यस्य च विभेदविषये कक्षायां परामर्शं कुरुत ।**

४. **समुचितविकल्पं (✓) चिह्नेन दर्शयत**

(क) अवकाशस्य दिवसे त्वं किं करोषि ?

(अ) गृहकृत्ये मातुः सहयोगं करोमि ।

(आ) सखिभिः सह खेलामि ।

(इ) स्नानं, वस्त्रप्रक्षालनं, गृहस्य कार्याणि च करोमि ।

(ई) उपरितनं सर्वं करोमि ।

(ख) प्रातः समुत्थाय प्रथमं किं करोषि ?

(अ) विद्यालयं गच्छामि ।

(आ) नित्यकर्म, योगाभ्यासं गृहकार्यं च करोमि ।

(इ) भोजनं करोमि ।

(ई) भगिन्या भ्रात्रा वा सह कलहं करोमि ।

(ग) तव वस्त्राणि कः प्रक्षालयति ?

(अ) माता प्रक्षालयति ।

(आ) अहं स्वयमेव प्रक्षालयामि ।

(इ) रजकः प्रक्षालयति ।

(ई) कोऽपि न प्रक्षालयति ।

(घ) त्वं गृहस्य सज्जतायै किं कुरुषे ?

(अ) जलेन पुष्पाणि सिञ्चामि ।

(आ) प्राङ्गणस्य मार्जनं करोमि ।

(इ) प्रकोष्ठस्य व्यवस्थापनं करोमि ।

(ई) उपर्युक्तं सर्वं करोमि ।

षोडशः पाठः

# सन्मार्गः



अयोध्याया निकटे कोशलप्रदेश आसीत्। प्रसेनजित् तत्रत्यो राजा आसीत्। स महात्मनो बुद्धस्य शिष्य आसीत्। कस्मिँश्चित् समये महात्मा बुद्धः स्वशिष्येण सह मेलनाय कौशलस्य राजधानीं श्रावस्तीं प्राप्तवान् आसीत्। स तेन सह अमिलत् तदानीं प्रसेनजित् चिन्ताकुल आसीत्।

स्वशिष्यं चिन्ताकुलं वीक्ष्य महात्मना बुद्धेन चिन्ताकारणं पृष्टम्। प्रसेनजित् प्रत्युदतरत्, "भगवन्! मम राज्ये अङ्गुलिमालनामकः कश्चन दुष्टः अस्ति। स सदैव भयानकम् उपद्रवं

करोति । तेन मदीयाः प्रजा अत्यन्तं सन्त्रस्ताः सन्ति । अत एव चिन्ताकुलः अस्मि । किं करवाणि ? मम पार्श्वे नास्ति कश्चन उपायः ।" महात्मा बुद्धः राजानं धैर्यम् अवलम्बितुम् आदिश्य अकथयत्, "मास्तु चिन्ता, अहं कञ्चन उपायं साधयिष्यामि ।"

वस्तुतः अङ्गुलिमालो नृशंसो दुष्टश्च आसीत् । तस्य हिंसाचरणेन प्रसेनजित् अतीव व्याकुलः अवर्तत । स सहस्रं जनान् व्यापादयिष्यामीति प्रतिज्ञाय नृशंसकार्ये लग्न आसीत् । तदानीं यावत् स कियतो जनान् व्यापादितवान् इति तथैव वक्तुं न पार्यते स्म, परन्तु तस्य गले विलम्बितां मालां विलोक्य ज्ञातुं शक्यते स्म । यतो हि, स एव स्वस्य प्रतिज्ञायाः पूरणं कदा भविष्यतीति विज्ञातुं जनान् व्यापाद्य प्रतिजनम् एकैकम् अङ्गुलिं मृतशरीरात् वियोज्य गलस्थे मालासूत्रे संयोज्य धारयति स्म । अङ्गुलिभिः रचितायाः मालायाः धारणेनैव तस्य नाम अङ्गुलिमाल आसीत् ।



तत्र राज्यस्थाः सर्वाः अपि प्रजाः अङ्गुलिमालस्य नामश्रवणमात्रेणापि भयेन कम्पन्ते स्म । स यतो निःसरति स्म, तत्रत्यानां जनानां शीघ्रतया पलायनं भवति स्म । तस्य क्रूरतायाः कथा चतुर्दिक्षु प्रसृता आसीत् । स्वशिष्यस्य राजधान्या निर्गत्य महात्मा बुद्धो वनं प्रति प्रस्थितवान्, यत्र अङ्गुलिमालः निवसति स्म । तस्मिन् वने प्रवेशः निषिद्ध आसीत् । तत्र वनस्य मुखद्वारे राज्ञा सुरक्षाभटा नियुक्ताः आसन्, ये तत्रागतान् जनान् वनप्रवेशात् निरुन्धन्ति स्म । यद्यपि सुरक्षाभटा जानन्ति स्म यत्, बुद्धसदृशानां महात्मनां न कश्चित् काञ्चन हानिं विदधातुं शक्नोति तथापि ते स्वकर्तव्यपालनाय तत्र न प्रवेष्टुं बुद्धम् अन्वरुन्धन् । महात्मा बुद्धः 'चिन्ता मास्तु' इति कथयन् वनं प्राविशत् ।

अपराह्णस्य समय आसीत् । उच्चावचे दुर्गमे च वनमार्गे चलन् बुद्धः श्रान्तः सन् अपि गतिं न न्यरुणत् । अनवरतं चलतः तस्य पृष्ठभागतः सहसा 'गतिं निरुन्धि' इति कश्चन आदेशात्मकं वाक्यं निजगाद । द्वितीयवारं च तदेव कठोरं वचनं श्रुत्वा स स्वगतिं न्यरुणत् । वनमार्गस्य निकटवर्तिन्या अरण्यान्या निर्गत्य एको भयङ्करो जनो बुद्धस्य पुरतः समुपस्थितः । खड्गहस्तः स जनः श्यामशरीरः, रक्तचक्षुः, विकीर्णकेशः, दीर्घश्मश्रुः, दीर्घबाहुः, विस्तीर्णवक्षाः, उन्नतशरीरश्च आसीत् । शरीरसंरचनया स दानव इव प्रतिभाति स्म । तस्य गलस्थाम् अङ्गुलिनिर्मितां मालां दृष्ट्वैव बुद्धः अजानात् यत् 'एषः एव अङ्गुलिमालः' इति ।

महात्मनो बुद्धस्य दृष्टिः अङ्गुलिमालस्य मुखाकृतौ अपतत् । स निरवच्छिन्नतया प्रेमभावेन अङ्गुलिमालं दृष्ट्वा अचकथत्, "अहं तु स्वगतिं न्यरुन्धम्, परन्तु त्वं कदा रुणत्सि ?" निर्भयतया पृष्टेन बुद्धप्रश्नेन अङ्गुलिमाल आश्चर्यम् उपगतः । यतो हि, तस्य पुरतः तदानीं यावत् न कोऽपि जनः तथा निर्भयतया व्यवहृतवान् आसीत् । जनाः तं दृष्ट्वैव पलायितुकामा भवन्ति स्म । मनसा स चिन्तितवान् 'क एषः ?, यः भयं विनैव स्मितं कुर्वन् मां पश्यन् अस्ति' इति ।

महात्मा बुद्धः पुनः अकथयत्, "कथय, कदा रुणत्सि स्वात्मानम् ?" शान्तचित्तेन महात्मना एवं प्रश्ने पुनरावृत्तेऽपि प्रश्नम् अनवबुद्धः स स्वस्य क्रौर्यं नियम्य अवदत्, "महात्मन् ! भवत्कथनं न बुद्धं मया ।" महात्मा अवोचत्, "अङ्गुलिमाल ! मनुष्यजीवने जन्मनः प्रारभ्य मरणं यावत् प्रतिक्षणं दुःखं वर्तते । क्रौर्यपूर्णेन कर्मणा दुःखम् इतोऽपि किमर्थं वर्धयसि ? अहं तु बोधिज्ञानेन सांसारिकाद् दुःखसंसर्गात् स्वात्मानं न्यरुन्धम्, परन्तु क्रूरकर्मशीलः त्वम् एतादृशकर्मभ्यः कदा स्वात्मानं निरुणत्सि ?"

यस्मात् सर्वेऽपि जना भयेन कम्पन्ते स्म, तादृश अङ्गुलिमालो निःशस्त्रस्यापि निर्भयस्य महात्मनो युक्तिपूर्णं वचनं श्रुत्वा कम्पितुं प्रारभत । स सहसा महात्मनो बुद्धस्य चरणयोः प्रणिपत्य अवदत्, "भगवन् ! मच्चक्षुषोः पुरतस्तु सर्वत्र तमोव्याप्तं वर्तते, कृपया सन्मार्गः सन्दर्श्यताम् ।"

बुद्धः स्नेहभावेन अङ्गुलिमालं समुत्थाप्य मैत्रीकरुणयोः अहिंसायाश्च विषये उपदेशं प्रायच्छत् । तस्य विवेकचक्षुषी समुन्मीलिते । स स्वगलस्थां मालां च विसृज्य महात्मनो बुद्धस्यैव शिष्यत्वं स्वीचकार । महात्मा बुद्धः च तं स्वशिष्यत्वेन अङ्गीचकार ।

## शिक्षणालोकः

दया-सम-समता-सहिष्णुतादिगुणा मानवाय अभयं ददति । तेषाम् अर्जनाय सदा प्रयतनीयम् इति शिक्षया छात्राः तदर्थं प्रेरयितव्याः ।

## अभ्यासः

## पाठानुशीलनम्

१. **सङ्क्षेपेण उत्तरयत**

(क) कोशलप्रदेशः कुत्र आसीत् ?

(ख) को महात्मनो बुद्धस्य शिष्य आसीत् ?

(ग) दुष्टस्य नाम किम् आसीत् ?

(घ) का अत्यन्तं सन्त्रस्ता आसन् ?

(ङ) अङ्गुलिमालो जनान् व्यापाद्य किं करोति स्म ?

(च) सुरक्षाभटाः किं जानन्ति स्म ?

(छ) निःशस्त्रः क आसीत् ?

(ज) महात्मा बुद्धः अङ्गुलिमालं कथम् अङ्गीचकार ?

**२. पाठाधारेण कथाक्रमेण लिखत**

(क) 'गतिं निरुन्धि' इति कश्चन आदेशात्मकं वाक्यं निजगाद ।

(ख) अङ्गुलिमालस्य हिंसाचरणेन प्रसेनजित् चिन्ताकुलः आसीत् ।

(ग) अङ्गुलिमालः शरीरसंरचनया दानव इव प्रतिभाति स्म ।

(घ) वनस्य मुखद्वारे राज्ञा सुरक्षाभटा नियुक्ता आसन् ।

(ङ) बुद्धः अङ्गुलिमालस्य गले अङ्गुलिनिर्मितां मालाम् अपश्यत् ।

(च) तत्र राज्ये अङ्गुलिमालनामकः कश्चन दुष्टः अस्ति ।

(छ) मच्चक्षुषोः पुरतस्तु सर्वत्र तमोव्याप्तं वर्तते ।

(ज) अङ्गुलिमालं दृष्ट्वा जनानां शीघ्रतया पलायनं भवति स्म ।

**३. क्रमेण सार्थबोधं पाठस्य अनुच्छेदानां वाचनं कुरुत ।**

**४. पाठस्थायाः कथायाः सारांशं श्रावयत ।**

**५. पाठाधारेण रिक्तस्थानं पूरयत**

(क) अयोध्याया निकटे ............ आसीत् ।

(ख) स सदैव भयानकम् ............ करोति ।

(ग) अतः ............ चिन्ताकुलः अस्मि ।

(घ) तस्य क्रूरतायाः कथा ............ प्रसृता आसीत् ।

(ङ) तस्मिन् वने ............ निषिद्ध आसीत् ।

(च) महात्मा बुद्धः ............ इति कथयन् वनं प्राविशत् ।

(छ) एको भयङ्करो जनो बुद्धस्य ............ समुपस्थितः ।

(ज) जन्मनः प्रारभ्य मरणं यावत् ............ दुःखं वर्तते ।

६. **विपर्ययान् परस्परं मेलयत**

| 'अ' समूहः | 'आ' समूहः |
|---|---|
| महात्मा | दूरे |
| निकटे | अहिंसा |
| तत्रत्यः | परस्य |
| हिंसा | दुष्टः |
| स्वस्य | अत्रत्यः |
| प्रवेशः | शान्तः |
| भयङ्करः | मानवः |
| दानवः | निर्गमः |
| प्रेमभावेन | प्रकाशः |
| तमः | क्रौर्यभावेन |

७. **शुद्धम् उच्चारयत**

स्नेहभावेन, विवेकचक्षुषी, स्वशिष्यत्वेन, स्वीचकार, अङ्गुलिमालः, तमोव्याप्तम्, एतादृशकर्मभ्यः, क्रूरकर्मशीलः, पुनरावृत्तेऽपि, निरवच्छिन्नतया, पलायितुकामाः, विस्तीर्णवक्षः, उन्नतशरीरश्च, विकीर्णकेशः, दीर्घश्मश्रुः, खड्गहस्तः, सुरक्षाभटश्च, वनप्रवेशात्, स्वकर्त्तव्यपालनाय, मृतशरीरात्, अवलम्बितुम्, राजधानीम्, कस्मिँश्चित् ।

८. **पदानि प्रयुज्य वाक्यानि रचयत**

शिष्यः, वीक्ष्य, धैर्यम्, अतीव, मालाम्, निवसति, वचनम्, प्रतिक्षणम्, परन्तु, पुरतः, सन्मार्गः, उपदेशम् ।

९. **पठित्वा प्रश्नान् उत्तरयत**

एकस्मिन् उद्याने बुद्धः ध्यानं कुर्वन् आसीत् । तत्र अनेके आम्रवृक्षाः आसन् । सर्वेऽपि वृक्षाः पक्वैः आम्रैः भरिताः आसन् । पञ्चषाणां बालानां समूहः तत्र आगच्छत् । बुद्धं दृष्ट्वा ते आदौ तं प्राणमन् अनन्तरं बुद्धाद् ईषद्दूरस्थम् आम्रवृक्षतलम् अगच्छन् । आम्राणि उपरि आसन् । बालाः सहजतया तानि भोक्तुं नैव समर्थाः अभवन् । अतस्ते शिलाखण्डैः वृक्षं प्राहरन् । आम्रफलानि अपतन्, बालाश्च क्रमेण तानि अखादन् । पुनः पुनः एवं कुर्वन्तः ते आम्रभक्षणेन रममाणाः आसन् । एकस्मिन् वारे तैः प्रहृतः शिलाखण्डः ईषद् दूरे

स्थितस्य बुद्धस्य चरणे अपतत् । बुद्धस्य चरणाद् रक्तम् अवहत् । तद् दृष्ट्वा अत्यन्तं भीताः बालकाः बुद्धस्य निकटम् अगच्छन् । ते दुःखिताः सन्तः क्षमाम् अयाचन्त । भीतान् तान् दृष्ट्वा बुद्धः अकथयत्- 'भो बालाः ! दुःखिता न भवत । यूयं शिलाखण्डेन वृक्षं प्राहरत, वृक्षः युष्मभ्यं स्वादूनि फलानि प्रायच्छत् परं शिलाखण्डेन प्रहृतः अपि अहं युष्मभ्यं किमपि दातुं न शक्नोमि । मम पार्श्वे युष्मभ्यं देयं किमपि नास्ति । तेन अधुना युष्माकम् अपेक्षया अहं दुःखितः अस्मि । यूयं मां क्षमध्वम् ।'

**प्रश्नाः**

(क) बुद्धः कुत्र ध्यानं कुर्वन् आसीत् ?

(ख) आम्रवृक्षाः कीदृशाः आसन् ?

(ग) बुद्धं दृष्ट्वा बालाः किम् अकुर्वन् ?

(घ) बालाः आम्रभक्षणाय किम् अकुर्वन् ?

(ङ) कुतः रक्तम् अवहत् ?

(च) बुद्धः किमर्थं दुःखी अस्ति ?

(छ) अस्याः कथायाः सन्देशः कः ?

१०. **अधःप्रदत्तं श्लोकं पठित्वा तदाशयं प्रकटयत**

अद्रोहः सर्वभूतेषु कर्मणा मनसा गिरा ।
अनुग्रहश्च दानञ्च शीलमेतद् विदुर्बुधाः ॥

११. **अधःप्रदत्तं श्लोकं पठित्वा तस्मात् चतुरः प्रश्नान् निर्माय उत्तराणि च लिखत**

क्रोधाद् भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः ।
स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात् प्रणश्यति ॥

१२. **क्रोधात् कथं हानिर्भवति ? काञ्चित् स्वदृष्टां स्वानुभूतां वा घटनाम् आधृत्य वर्णयत ।**

## व्यवहारानुशीलनम्

१. महात्मनो बुद्धस्य जीवनस्य नैके कथाप्रसङ्गाः सन्ति, यथा पाठे प्रस्तुतो वर्तते । कञ्चन एकम् अपरञ्च कथाप्रसङ्गं कक्षायां श्रावयित्वा तस्याः सन्देशस्य प्रयोगो जीवने कथं कर्तुं शक्यते ? विमृशत ।

२. यूयम् आत्मनः क्रोधस्य नियन्त्रणं कथं कुरुथ ? स्वानुभवं कक्षायां श्रावयत ।

३. युष्माकं कश्चित् सखा मांसाहारं कुरुते चेत् तस्य मांसाहारे अप्रवृत्तये यूयम् अहिंसाया महत्त्वप्रतिपादनं तस्य पुरः कथं कुरुथ ? कथयत ।

४. समुचिते उत्तरे (✓) चिह्नं कुरुत

(क) तव स्वच्छं वस्त्रं तव अनुजः अनुजा वा धारयित्वा मलिनम् अकारयत् चेत् किं करोषि ?

(अ) वस्त्रम् आच्छिद्य गृह्णामि, तं च निन्दामि ।

(आ) तस्य कपोलयोः चपेटं प्रहरामि ।

(इ) तद् वस्त्रं संयाच्य प्रक्षाल्य धारयामि ।

(ख) सख्युस्त्रुटौ शिक्षकः त्वाम् अनिन्दत् चेत् त्वं किं करोषि ?

(अ) शिक्षकमपि निन्दामि ।

(आ) तं सखायं ताडयामि ।

(इ) तूष्णीं स्थित्वा तं सखायं तथा न कर्तुम् अवबोधयामि ।

(ग) मातापितरौ कदाचित् तर्जनं कुरुतः । मातापित्रोः तादृशे तर्जने त्वं किं कुरुषे ?

(अ) मातापितृभ्यां सह विवादं करोमि ।

(आ) गृहं परित्यज्य अन्यत्रैव गच्छामि ।

(इ) 'एतत् तर्जनं मम समृद्धये एव अस्ति' इति विचार्य तयोः कथनस्य व्यवहारे पालनं करोमि ।

(घ) तव पुरः एव सखायौ विवदमानौ वर्तेते । त्वं किं करोषि ?

(अ) एकस्य पक्षं गृहीत्वा अपरं निन्दामि ।

(आ) 'हस्ते वर्तमाने किमर्थं मुखं सञ्चाल्यते ? ताडनं कुरु ।' इति कथयित्वा ज्वलिते अग्नौ घृतं क्षिपामि ।

(इ) 'कलहः न कर्तव्यः । परस्परं मिलित्वा स्थातव्यम् ।' इति वारं वारं कथयित्वा तौ कलहाद् निवारयामि ।

सप्तदशः पाठः

# सन्तोषसुखम्

**सन्तोषामृततृप्तानां यत्सुखं शान्तचेतसाम् ।**
**कुतस्तद् धनलुब्धानामितश्चेतश्च धावताम् ॥**

**पदच्छेदः** – सन्तोषामृततृप्तानाम्, यत्, सुखम्, शान्तचेतसाम्, कुतः, तद्, धनलुब्धानाम्, इतः, च, इतः, च धावताम् ।

**अन्वयः** – सन्तोषामृततृप्तानां शान्तचेतसां यत् सुखं (भवति) धनलुब्धानाम् इतः च इतः च धावतां तत् (सुखम्) कुतः ?

**अर्थः** – सन्तोषो जनानां कृते अमृततुल्यं वर्तते । सन्तोषरूपेण अमृतेन ये जनाः तृप्ताः भवन्ति, तेषां चित्ते शान्तिः जायते । येषां चित्तं शान्तं भवति, ते परमं सुखं प्राप्नुवन्ति । ये असन्तुष्टाः सन्ति, लुब्धाः सन्ति, ते धनस्य कृते सर्वदा इतस्ततः धावन्ति । अतः तेषां चित्ते कदापि शान्तिः न जायते । यस्य चित्तम् अशान्तं भवति, स कदापि सुखं प्राप्तुं न शक्नोति ।

**अकृत्वा परसन्तापमगत्वा खलमन्दिरम् ।**
**अनुत्सृज्य सतां मार्गं यत्स्वल्पमपि तद् बहु ॥**

**पदच्छेदः** – अकृत्वा, परसन्तापम्, अगत्वा, खलमन्दिरम्, अनुत्सृज्य, सताम्, मार्गं, यत्, स्वल्पम्, अपि, तद्, बहु ।

**अन्वयः** – परसन्तापम् अकृत्वा खलमन्दिरम् अगत्वा, सतां मार्गम् अनुत्सृज्य यत् स्वल्पम् (अर्ज्यते), तद् अपि बहु (भवति) ।

**अर्थः –** अन्येभ्यो दुःखं न दत्त्वा अर्थात् अन्यान् न पीडयित्वा, मूर्खाणां गृहं न गत्वा अर्थात् सज्जनानां मार्गं न त्यक्त्वा अर्थात् शास्त्रोक्तमार्गस्य अनुसरणं कृत्वा अर्जितं स्वल्पम् अपि धनम् अधिकं भवति, यतः तेन धनेन जनस्य हृदये सन्तुष्टिः उत्पद्यते ।

**आत्माधीनशरीराणां स्वपतां निद्रया स्वया ।**
**कदन्नमपि मर्त्यानाममृतत्वाय कल्पते ॥**

**पदच्छेदः –** आत्माधीनशरीराणाम्, स्वपताम्, निद्रया, स्वया, कदन्नम्, अपि, मर्त्यानाम्, अमृतत्वाय, कल्पते ।

**अन्वयः –** आत्माधीनशरीराणां स्वया निद्रया स्वपतां मर्त्यानां कदन्नम् अपि अमृतत्वाय कल्पते ।

**अर्थः –** ये स्वाधीनाः स्वतन्त्राश्च भवन्ति, ते सुखपूर्वकं शयितुं शक्नुवन्ति । ये पराधीना भवन्ति, ते सुखपूर्वकं शयितुम् अपि न शक्नुवन्ति, यतः स्वप्ने अपि तेषाम् अग्रे पराधीनता उपस्थिता भवति । यतः स्वाधीनानां स्वच्छन्दरूपेण स्वपतां जनानां कृते कदन्नम् अपि अमृततुल्यं भवति, पराधीनानां कृते तु मिष्टान्नम् अपि स्वादहीनं भवति ।

**यो मे गर्भगतस्यापि वृत्तिं कल्पितवान् स्वयम् ।**
**शेषवृत्तिविधाने च स किं सुप्तोऽथवा मृतः ॥**

**पदच्छेदः –** यः मे, गर्भगतस्य, अपि, वृत्तिम्, कल्पितवान्, स्वयम्, शेषवृत्तिविधाने, च, सः, किम्, सुप्तः, अथवा, मृतः ।

**अन्वयः –** यः गर्भगतस्य अपि मे स्वयं वृत्तिं कल्पितवान्, शेषवृत्तिविधाने स सुप्तः अथवा मृतः किम् ?

**अर्थः –** गर्भस्थस्य प्राणिनः अपि यः स्वयं वृत्तिं विदधाति, स तस्य प्राणिनः जीवनवृत्तिम् अपि स्वयमेव कल्पयति । स प्राणिनः जीवनवृत्तिविधानसमये न तु मृतो भवति, न तु सुप्तो भवति । अतः जनैः स्वस्य उदरपूरणार्थम् अनेके पापाचाराः न करणीयाः, केवलं सन्तोषः ग्रहणीयः ।

**सर्वत्र सम्पदस्तस्य सन्तुष्टं यस्य मानसम् ।**

**उपानद्गूढपादस्य नूनं चर्मावृतैव भूः ॥**

**पदच्छेदः –** सर्वत्र, सम्पदः, तस्य, सन्तुष्टम्, यस्य, मानसम्, उपानद्गूढपादस्य, नूनम्, चर्मावृता, एव, भूः ।

**अन्वयः –** यस्य मानसं सन्तुष्टम् अस्ति तस्य सर्वत्र सम्पदः (भवन्ति) । नूनम् उपानद्गूढपादस्य भूः एव चर्मावृता (भवति) ।

**अर्थः –** यस्य जनस्य पादौ उपानद्भ्यां रक्षितौ वर्तेते, तस्य कृते सम्पूर्णा एव पृथ्वी चर्मावृता इव भवति, मार्गस्थाः कण्टकाः तस्य पादौ खण्डयितुं न शक्नुवन्ति, अतः तस्य कृते पृथ्वी निष्कण्टका भवति । एवमेव यस्य मनः सन्तुष्टम् अस्ति, तस्य कृते सर्वत्र सम्पत्तयः भवन्ति । सन्तोषस्य कारणेन स कुत्रापि दुःखं नानुभवति, सर्वत्र सुखमेव अनुभवति । तस्य कृते दुःखस्य विषयः संसारे न अवशिष्यते ।

## शिक्षणालोकः

अस्य पाठस्य अध्ययनानन्तरं छात्राः 'सन्तोष एव सुखमस्ति लोभो दुःखस्य कारणम् अस्ति' इति विषये अवबोधनीयाः । शिक्षकेण सन्तोषविषयका अन्येऽपि श्लोका अन्वेषणीयाः, ततश्छात्राः तेषां तात्पर्यविषये बोधनीयाः ।

## अभ्यासः

### पाठानुशीलनम्

१. **शुद्धम् उच्चारयत**

धनलुब्धानाम्, अनुत्सृज्य, यत्स्वल्पमपि, मर्त्यानाम्, शेषवृत्तिविधाने, उपानद्गूढपादस्य

२. **पाठस्थानां श्लोकानां श्रुतलेखनं कुरुत ।**

३. **एकपदेन उत्तरयत**

(क) शान्तचेतसः किं प्राप्नुवन्ति ?

(ख) केषां मार्गम् अनुत्सृज्य स्वल्पम् अपि बहु ?

(ग) आत्माधीनशरीराणाम् किं अमृतत्वाय कल्पते ?

(घ) कस्य भूः चर्मावृता ?

४. **सङ्क्षेपेण उत्तरयत**

(क) के सन्तोषसुखं न लभन्ते ?

(ख) कथम् अर्जितं स्वल्पम् अपि द्रव्यं बहु भवति ?

(ग) आत्माधीनशरीराणां को विशेषः ?

(घ) गर्भस्थस्यापि प्राणिनः वृत्तिं कः कल्पयति ?

(ङ) कस्य कृते सर्वत्र सम्पदः विलसन्ति ?

(च) कीदृशा जनाः सन्तोषसुखं प्राप्नुवन्ति ?

५. **अधस्तनानि पदानि प्रयुज्य वाक्यानि रचयत**

कुतः, मार्गः, कल्पते, स्वयम्, सर्वत्र ।

६. **'यत्स्वल्पमपि तद् बहु' इत्यस्य तात्पर्यं प्रकाशयत ।**

७. **पद्यं सरलार्थं च पठित्वा प्रश्नानाम् उत्तराणि लिखत**

सम्पत्तौ च विपत्तौ च महतामेकरूपता ।

उदये सविता रक्तो रक्तश्चास्तमये तथा ॥
सन्तोषः परमं सौख्यं सन्तोषः परमामृतम् ।
सन्तोषः परमं पथ्यं सन्तोषं परमं हितम् ॥

**सरलार्थः**

ज्ञानिनां स्वभावः सम्पत्तौ विपत्तौ च तुल्यो भवति । ते सम्पत्तौ उन्मत्ता न भवन्ति । विपत्तौ च उद्विग्ना न भवन्ति । यथा सूर्यः यदा उदेति तदा अपि रक्तो भवति, यदा अस्तमेति तदा अपि रक्त एव भवति ।

सन्तोषः एव सुखस्य कारणम् अस्ति, यतः सन्तोषोऽमृततुल्यो भवति । सन्तोषः औषधतुल्यो भवति । सन्तोष एव हितकारी अपि भवति । अतोऽस्माभिः सर्वत्र सन्तोषः करणीयः ।

**प्रश्नाः**

(क) महान्तः कीदृशाः भवन्ति ?
(ख) रविः उदये अस्ते च कीदृशो भवति ?
(ग) परमं सौख्यम्, परमामृतञ्च किम् ?
(घ) श्लोकमाधृत्य सन्तोषस्य विषये त्रीणि वाक्यानि लिखत ।

## ८. परस्परं मेलयत

| | |
|---|---|
| सन्तोषः | बहु |
| लोभः | अमृतम् |
| स्वल्पम् | सुखम् |
| कदन्नम् | दुःखम् |

## ९. समुचितं पदं विन्यस्य रिक्तस्थानं पूरयत

(क) सुखाय चित्तं ............. कर्तव्यम् । (शान्तम्, लुब्धम्, रुष्टम्)
(ख) सन्तोषाय .............. मार्गः अनुसरणीयः । (दुष्टानाम्, मूर्खाणाम्, सज्जनानाम्)
(ग) ............. जनाः सन्तुष्टा भवन्ति । (पराधीनाः, स्वाधीनाः, धनहीनाः)
(घ) सन्तुष्टस्य जनस्य कृते ............. सम्पदो भवन्ति । (एकत्र, अन्यत्र, सर्वत्र)

## १०. सत्यासत्यं विवेचयत

(क) धनलुब्धाः सुखं प्राप्नुवन्ति ।

(ख) सन्तोषाय परसन्तापः कार्यः ।

(ग) स्वया निद्रया स्वपन्तः सन्तुष्टा भवन्ति ।

(घ) परमेश्वरः सर्वेषां वृत्तिं कल्पयति ।

११. **कथां पठित्वा उत्तराणि लिखत**

बुद्धस्य समये कश्चन दरिद्रः मनुष्यः आसीत् । स सदा याच्ञया स्वस्य आजीविकां निर्वहति स्म । तस्य मनसि कदापि सन्तोषो न भवति स्म । किन्तु प्रतिदिनं सः बुद्धस्य समीपे गच्छतः जनान् पश्यति स्म । ते सर्वदा अश्रुपूरितनयनाः बुद्धस्य समीपे गच्छन्ति स्म, किन्तु हृष्टाः ततो प्रत्यागच्छन्ति स्म । किन्तु तेषां हस्ते रूप्यकाणि, सुवर्णम्, रजतं वा नैव भवति स्म । एतद् दृष्ट्वा याचकः विचारितवान् अहमपि बुद्धस्य समीपे गच्छामि । तद् विचार्य सः बुद्धस्य समीपं गतवान् । बुद्धस्य दर्शनाय जनानां दीर्घतमा पङ्क्तिरासीत् । सः अपि पङ्क्तौ स्थितवान् । किञ्चित्कालानन्तरं सः बुद्धस्य समीपे प्रापत् । बुद्धस्य समीपं गत्वा स उक्तवान् - "अहम् अतीव दरिद्रोऽस्मि । मम पार्श्वे किमपि नास्ति । आजीविकायै अपि सर्वदा मार्गे याच्ञा करणीया । एतेन अहं सर्वदा क्षुब्धो भवामि । कृपया धनलाभस्य उपायं वदतु" इति । बुद्धः स्मितेन उक्तवान्, "त्वम् परोपकारं दानं वा किमपि न करोषि अतः क्षुब्धोऽसि" इति । याचक उक्तवान्, "यस्य आजीविका एव भिक्षया चलति तेन किं दीयते, कथं वा परोपकारः विधीयते ?" इति । बुद्धः पुनः स्मितेन उवाच, "ममापि जीवनं भिक्षया एव चलति । तथाप्यहं प्रसन्न एवास्मि । अहं तु त्वां हृष्टं पुष्टं च पश्यामि । तव शरीरे प्रभूतं बलम् वर्तते । तव वाणी अपि मधुरा वर्तते । बाहुबलेन, वाण्या वा त्वं बहूनि कार्याणि कर्तुं शक्नोषि । अशक्तानां दुर्बलानां वा सेवां कर्तुं शक्नोषि, मधुरया वाण्या जनान् उद्बोधयितुं शक्नोषि । संसारे बहवः प्राणिनः सन्ति ये विकलाः सन्ति, रुग्णाः सन्ति । किन्तु त्वम्...." इति । बुद्धस्य एतादृशं समुद्बोधनं श्रुत्वा सः प्रसन्नो बभूव । आत्मानं च धनिनं मत्वा ततः प्रत्यागतवान् । सेवया परोपकारेण च सन्तोषपूर्वकं जीवनं यापयितुम् आरब्धवान् ।

(क) एकपदेन उत्तरयत

(अ) दरिद्रः कया वृत्त्या आजीविकां निर्वहति स्म ?

(आ) याचकः कस्य समीपम् अगच्छत् ?

(इ) याचकः बुद्धस्य समीपं गत्वा कस्य उपायम् अपृच्छत् ?

(ई) संसारे बहवः प्राणिनः कीदृशाः सन्ति ?

(उ) याचकस्य वाणी कीदृशी आसीत् ?

(ख) सङ्क्षेपेण उत्तरयत

(अ) जनाः बुद्धस्य समीपे कथं गच्छन्ति स्म, कथं च प्रत्यागच्छन्ति स्म ?

(आ) बुद्धस्य समीपं गत्वा याचकः किम् उक्तवान् ?

(इ) बुद्धस्यानुसारेण याचकः किमर्थं क्षुब्धः वर्तते ?

(ई) बाहुबलेन वाण्या वा किं किं कर्तुं शक्यते ?

(उ) याचकः कथं प्रत्यागतवान् ?

(ग) उपर्युक्तकथायाः सन्देशं सरलशब्दैः लिखत ।

१२. **शिक्षकस्य सहयोगेन सरलार्थं लिखत**

गते शोको न कर्तव्यो भविष्यं नैव चिन्तयेत् ।
वर्तमानेन कालेन प्रवर्तन्ते विचक्षणाः ॥

१३. **अधस्तनपद्यं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि दत्त**

अर्थी करोति दैन्यं लब्धार्थो गर्वं परितोषं च ।
नष्टधनश्च स शोकं सुखमास्ते निःस्पृहः पुरुषः ।

**प्रश्नाः**

(क) याचकः किं करोति ?

(ख) धनं प्राप्य जनः किं किं करोति ?

(ग) धननाशानन्तरं नरः किं करोति ?

(घ) कः सुखपूर्वकं तिष्ठति ?

(ङ) 'लब्धार्थः' इत्यस्य सन्धिविच्छेदं कुरुत ।

## व्यवहारानुशीलनम्

१. **सन्तोषस्य विषये अपरं पद्यद्वयम् अन्विष्य तयोः तात्पर्यं विशदीकुरुत ।**

२. **को वास्तविकं सुखं लभते ? कक्षायां परामर्शं कुरुत ।**

३. **सन्तोषसुखस्य वर्णनं कुर्वन् कार्यार्थं विदेशं गतवते मित्राय प्रेषणार्थं पत्रमेकं रचयत ।**

४. **समुचितविकल्पं (✓) चिह्नेन दर्शयत**

(क) त्वं जीवने किम् अधिकम् इच्छसि ?

(अ) धनार्जनम्    (आ) विद्यार्जनम् (इ) सुखं शान्तिं च

(ख) सख्युः पार्श्वे धनम् अस्ति, तव पार्श्वे नास्ति चेत् किं करोषि ?

(अ) सन्तोषपूर्वकं वसामि ।

(आ) धनार्जनाय विद्यालयं परित्यज्य गच्छामि ।

(इ) सख्युः धनं चोरयामि ।

(ई) निराशो भवामि ।

(ग) भोजनम् अधिकं स्वादु नास्ति चेत् त्वं किं करोषि ?

(अ) मातरं तर्जयामि ।

(आ) भोजनं अवकरपात्रे क्षिपामि ।

(इ) सन्तोषपूर्वकं भोजनं करोमि ।

(ई) बुभुक्षितः एव वसामि ।

(घ) कश्चन सखा तुभ्यं उपहारं ददाति चेत् किं करोषि ?

(अ) दुःखितो भवामि ।

(आ) धन्यवादेन तम् अभिनन्दामि ।

(इ) किमपि नैव करोमि ।

(ई) ततोऽपि महर्घम् उपहारं तस्मै ददामि ।

अष्टादशः पाठः

# लुप्तमहादेवः

पार्वती शिवशक्तिस्वरूपा मन्यते। एतस्याः देव्याः द्वे रूपे स्तः– कोमलम्, भयङ्करं च। कोमलस्वरूपिणी पार्वती उमा, गौरी, हैमवती, जगन्माता, भवानी च निगद्यते। इमानि पार्वत्याः सौम्यरूपाणि सन्ति। भयङ्कररूपिणी पार्वती दुर्गा, काली, श्यामा, चण्डी, चण्डिका, भैरवी, भद्रकाली, भीमादेवी, चामुण्डा, रक्तदन्तिका च उच्यते। महादेवः पार्वतीं भगवती, ईशानी, ईश्वरी, कपालिनी चेति नामभिः अपि सम्बोधयति स्म।



महादेवः पार्वती च कैलाशे विराजमाने आस्ताम् । तयोः सम्बन्धः शब्दार्थयोः सम्बन्ध इव आसीत् । पार्वती समये समये विभिन्नानि भयङ्कररूपाणि धृत्वा इतस्ततः भ्रमति स्म । सा मद्यं मांसं च अखादत् । महादेवाय एतत् सर्वं न रोचते स्म । स सत्त्वगुणस्य देवः आसीत् । स तामसपदार्थान् न अभक्षयत् । पार्वती सङ्कोचं मत्वा स्ववेदनां शिवम् अकथयत् । सा उक्तवती, "स्वामिन्, अहं नैकरूपं धारयामि । मद्यं मांसं च खादामि । अनेन भवद्भ्यः महत् कष्टं जातम् । अस्य निवारणाय अस्ति कोऽपि उपायः ?"

महादेवः मन्दहासेन अवोचत्, "पार्वति, न त्वमेव एकाकिनी तत् करोषि । अहम् अपि यदा कदा मद्यं मांसं च खादामि । चिन्तां मा कुरु । त्वद् अहं कथं भिन्नः भवितुं शक्नोमि ।"

पार्वत्यां महादेवस्य कथने विश्वासः नाभवत् । सा पत्युः कथनं छलं परिहासं च मेने । पार्वती महादेवम् अवदत् "देव, भवतां कथने मम विश्वासः नास्ति । भवन्तः आमिषभोजनं कथं कुर्वन्ति ? असम्भवम् ।"

महादेवः पार्वतीं भूयो भूयः विश्वासम् अदापयत् । पार्वत्याः शङ्का निवारिता नाभवत् । सा पतिं पुनः अकथयत्, "तर्हि भवतां मद्यमांसयोः भक्षणं द्रष्टुम् इच्छामि । तदा शङ्का समाहिता स्यात् । मम इच्छा कथं पूर्णा भवेत् ?"

पार्वत्याः इच्छां पूरयितुं महादेवः चैत्रकृष्णचतुर्दश्यां पिशाचस्य रूपम् अधरत् । स मूलकस्य राजिकायाश्च क्षेत्रम् अगच्छत् । तत्र गुप्ते गर्ते अवसत् । स मद्यम्, मांसम्, रसोनं च खादित्वा पार्वत्याः इच्छां पूरयामास ।

इमाम् एव जनश्रुतिम् आश्रित्य अस्यां तिथौ नेवारसमुदायस्य जनाः गर्तस्थितं लुप्तमहादेवं पूजयन्ति । अयं महादेवः 'लुकु महाद्य' इत्युच्यते । अन्येषु दिवसेषु शिवपूजने तामसवस्तूनि न समर्प्यन्ते । केवलम् एतस्यां तिथौ इमे जनाः लुप्तमहादेवाय मद्यम्, मांसम्, रसोनम्, मूलकस्य राजिकायाश्च शाके विकसितानि पुष्पाणि च समर्पयन्ति । अन्यसमये सङ्गोप्य स्थापितः महादेवः अस्मिन् दिने अनावृत्य खनित्वा वा प्रकाश्यते । ततः आत्मनां भक्षणीयानि तामसवस्तूनि सश्रद्धं समर्प्य लुप्तमहादेवः सम्पूज्यते । इयं महादेवपूजनस्य मौलिकपरम्परा वर्तते । अनया नेवारसमुदायस्य शिवशक्त्योः भक्तिश्च द्योत्यते ।

## शिक्षणालोकः

स्वस्थानस्य भ्रमणं कृत्वा ज्येष्ठैः सह संलापं विधाय अनुसन्धानाय छात्राः प्रेरणीयाः ।

## अभ्यासः

## पाठानुशीलनम्

१. **पाठस्य सस्वरवाचनं कुरुत ।**

२. **शुद्धम् उच्चारयत**

शिवशक्तिस्वरूपा, कोमलस्वरूपिणी, हैमवती, भयङ्कररूपिणी, रक्तदन्तिका, शब्दार्थयोः, अभक्षयत्, सङ्कोचम्, एकाकिनी, आमिषभोजनम्, चैत्रकृष्णचतुर्दश्याम्, जनश्रुतिम्, भक्षणीयानि, सश्रद्धम्, शिवशक्त्योः ।

३. **पाठाधारेण संशोध्य लिखत**

(क) शिवपार्वत्योः सम्बन्धः शब्दार्थयोः सम्बन्ध इव आसीत् ।

(ख) महादेवः सत्त्वगुणस्य देवःनासीत् ।

(ग) पार्वती पत्युः कथनं छलं परिहासं च मेने ।

(घ) महादेवः चैत्रकृष्णचतुर्दश्यां मनुष्यस्य रूपम् अधरत् ।

(ङ) नेवारसमुदायस्य जनाः गर्तस्थितं लुप्तमहादेवं पूजयन्ति ।

(च) अन्येषु दिवसेषु अपि शिवपूजने तामसवस्तूनि समर्प्यन्ते ।

४. **पाठस्य सारांशं वदत ।**

**५. पदावलीः परस्परं मेलयत**

| ‘अ’ समूहः | ‘आ’ समूहः |
|---|---|
| गौरी पार्वत्याः | भयङ्कररूपम् अस्ति । |
| भैरवी पार्वत्याः | कैलाशे विराजमाने आस्ताम् । |
| महादेवः पार्वती च | सौम्यरूपम् अस्ति । |
| पार्वती स्ववेदनाम् | अवोचत् । |
| महादेवः मन्दहासेन | शिवम् अकथयत् । |
| भवतां कथने | ‘लुकु महाद्य’ इत्युच्यते । |
| अयं महादेवः | मम विश्वासः नास्ति । |

**६. मञ्जूषायाः पदानि प्रयुज्य रिक्तस्थानं पूरयत**

**(धारयामि, शिवशक्तिस्वरुपा, द्वे, गर्ते, भिन्नः, मौलिकपरम्परा, विश्वासः)**

(क) पार्वती .................. मन्यते ।

(ख) पार्वत्याः ............ रूपे स्तः ।

(ग) स्वामिन्, अहं नैकरूपम् ............... ।

(घ) त्वद् अहं कथम् ................ भवितुं शक्नोमि ।

(ङ) पार्वत्यां महादेवस्य कथने ............... नाभवत् ।

(च) महादेवः गुप्ते .................. अवसत् ।

(छ) इयं महादेवपूजनस्य .............. वर्तते ।

**७. पदानि प्रयुज्य वाक्यानि रचयत**

उमा, उच्यते, सम्बन्धः, भ्रमति, मत्वा, एकाकिनी, शङ्का, द्रष्टुम्, तर्हि, इच्छाम्, दिवसेषु, भक्तिः, द्योत्यते ।

८. **सङ्क्षेपेण उत्तरयत**

(क) कोमलस्वरूपिण्याः पार्वत्याः नामानि कानि ?

(ख) महोदवः कैः नामभिः पार्वतीं सम्बोधयति स्म ?

(ग) पार्वती किं किम् अखादत् ?

(घ) पार्वती स्ववेदनायां किम् उक्तवती ?

(ङ) पार्वती स्वशङ्कां निवारियतुं महादेवं किम् अकथयत् ?

(च) महादेवः कुत्र अगच्छत् ?

(छ) जनश्रुतिम् आश्रित्य जनाः किं वदन्ति ?

(ज) चैत्रकृष्णचतुर्दश्यां जनाः महादेवाय किं किं समर्पयन्ति ?

(झ) महादेवः कथं प्रकाश्यते ?

(ञ) महादेवपूजनस्य मौलिकपरम्परया किं द्योत्यते ?

९. **पर्यायं निश्चित्य लिखत**

(क) शिवः = ................ (शङ्करः, विधाता, नारायणः)

(ख) देवी = ................ (राज्ञी, भगवती, सुन्दरी)

(ग) समयः = ................ (प्रभातम्, दिनम्, कालः)

(घ) कष्टम् = ................ (दुःखम्, आनन्दः, विश्रामः)

(ङ) भिन्नः = ................ (पूर्णः, पृथक्, एकः)

(च देवः = ................ (असुरः, गन्धर्वः, सुरः)

(छ) कथनम् = ................ (वचनम्, हसनम्, रमणम्)

(ज) जनः = ................ (मनः, जन्तुः, मनुजः)

## १०. गद्यांशं पठित्वा प्रश्नान् उत्तरयत

सम्प्रति नैपालकेषु विदेशमोहः अतीव दृश्यते । न केवलम् अध्ययनार्थम्, अपि तु धनार्जनाय बहवः जनाः विदेशं गच्छन्ति । नेपालः प्राचीनकालाद् एव स्वतन्त्रः देशः आसीदिति ते विस्मरन्ति । नेपालस्य सर्वकारः तान् स्वेदेशे एव रक्षणाय अपेक्षितान् कार्यक्रमान् सञ्चालयितुम् असमर्थ इवानु भूयते । यदि तान् अत्रैव रक्ष्यते चेद् देशविकासाय तेषां श्रमस्य उपयोगः स्यात् । शिल्पकलादिकं प्रशिक्ष्य यदि कार्येषु ते नियोज्यन्ते तर्हि देशविकासः अवश्यमेव भवति । कश्चिदपि नागरिकः विदेशं गत्वा श्रमं करोति चेत् विदेशस्य विकासः भवति । स एव अत्र स्थित्वा श्रमं करोति चेद् देशस्य विकासः निश्चित एव ।

अस्माकं पूर्वजैः देशस्य स्वतन्त्रतां रक्षितुं प्राणाः उत्सृष्टाः । ते देशस्य विकासं द्रष्टुम् इच्छन्ति स्म । अस्माकं भूम्यामेव त्यागी जनकः, ज्ञानी बुद्धः, वीरः बलभद्रश्च अजायन्त । परन्तु सम्प्रति देशस्य बहवो जनाः विदेशं गत्वा कार्यं कुर्वन्ति । एष महत्खेदस्य विषयः वर्तते । न्यूनपारिश्रमिकं गृहीत्वा अन्येषां सेवकतया कार्यं कर्तुम् उद्यतानां जनानाम् आवश्यकता देशविकासाय अत्रैव भवति । यदि अनया रीत्या देशीयाः बहिर्गच्छन्ति चेद् अस्मिन् देशे केभ्यश्चिद् वर्षेभ्यः पश्चाद् बालाः वृद्धाः एव अवशिष्यन्ते । स्वभाषायाम्, स्वजन्मभूमौ च युवकेषुयुवतीषु प्रेम न दृश्यते । अन्येषां संस्कृतीनाम् अनुसरणं स्वसंस्कृतेः लोपं कारयति । अधुना देशप्रेम आवश्यकं वर्तते । देशे स्थित्वा एव देशस्य विकासः सम्भवः । स्वदेशे एव किमपि कार्यं कृत्वा देशस्य विकासाय सर्वैः प्रयतनीयम् ।

### (अ) एकपदेन उत्तरयत

(क) सम्प्रति केषां विदेशमोहः दृश्यते ?

(ख) पूर्वजाः देशस्य किं द्रष्टुम् इच्छन्ति स्म ?

### (आ) एकवाक्येन उत्तरयत

(क) जनाः विदेशं किमर्थं गच्छन्ति ?

(ख) सर्वकारः कीदृशः अवलोक्यते ?

(ग) कथं देशस्य विकासः निश्चितः भवति ?

(घ) महत्खेदस्य विषयः कः ?

(इ) **शिक्षकसाहाय्येन परस्परं मेलयत**

| ‘अ’ समूहः | ‘आ’ समूहः |
|---|---|
| देशविकासाय तेषां श्रमस्य | आवश्यकम् अस्ति । |
| शिल्पकलादिकस्य प्रशिक्षणम् | प्राणाः उत्सृष्टाः । |
| पूर्वजैः देशं रक्षितुम् | बुद्धः अजायत । |
| अस्माकं भूमौ | उपयोगः स्यात् । |
| जनानां स्वजन्मभूमौ | विकासः सम्भवः । |
| देशे स्थित्वा एव देशस्य | प्रेम न दृश्यते । |

११. **महादेवस्य ‘लुकु महाद्य’ इति नाम्नः विषये कक्षायां विमृशत ।**

## व्यवहारानुशीलनम्

१. कस्याश्चन स्थानीय संस्कृतेः विषये अनुच्छेदं रचयित्वा कक्षायां श्रावयत ।

२. संस्कृतिः कथम् अस्माकं परिचयः भवति ? स्वविचारान् प्रस्तुत ।

एकोनविंशः पाठः

# आपणाटनम्

(अजयः मातुलेन सह आपणं गच्छति । तत्र बहवः जनाः सन्ति । ते स्वस्वकार्येषु संलग्नाः वर्तन्ते । मातुलः मार्गात् कदल्याः वल्कलम् उत्थाप्य अवकरमञ्जूषायां निक्षिपति ।)

**अजयः** मातुल, भवान् कथम् अवकरम् उत्थापयति ? हस्तौ दूषितौ न भवतः ?

**मातुलः** मार्गस्य अवकरः उत्थापयितव्यः एव भवति, भागिनेय ! हस्तौ स्वच्छीकर्तुं शक्येते । एतत् सुकरम् । मार्गस्य स्वच्छीकरणं तु दुष्करं भवति ।

**अजयः** अवकरस्य उत्थापनस्य कर्तव्यं पालिकायाः अस्ति । एतत् कर्म अस्माकं कथं भवति ?

**मातुलः** न तद् वक्तव्यम्, भागिनेय ! अवकरस्य व्यवस्थापनं सर्वैः कर्तव्यम् । इदं नागरिकस्य सभ्यतापरिचायकं मन्यते ।

**अजयः** अनेन कार्येण कः लाभः भवति, मातुल ?

**मातुलः** बहवः लाभाः सन्ति, भागिनेय ! नगरं स्वच्छं सुन्दरं च भवति । रोगाः दूरं पलायन्ते । सङ्क्रामकाः विषाणवः स्वयं विलीयन्ते । राष्ट्रम् उन्नतिपथं आरोहति ।

**अजयः** वयं यानि सार्वजनिकानि कार्याणि कुर्मः तानि सर्वाणि राष्ट्रस्य उन्नत्यै भवन्ति ?

**मातुलः** सत्यं वदसि, भागिनेय ! सत्यम् ! सर्वैः राष्ट्रसेवा कर्तव्या अन्यथा अस्माकम् अध्ययनमेव व्यर्थं स्यात् ।

**अजयः** (रक्षिणं सङ्केत्य) स हस्ते यष्टिं दधानः अस्ति । स अपि राष्ट्रस्य एव सेवां करोति, मातुल ?

**मातुलः** कथं न करोति ? स सर्वकारेण जनतायाः सुरक्षायै नियुक्तः वर्तते । स आवश्यकतायां सत्यां जनतां च सेवते । स एव अपराधिनम् अन्विष्य निगृह्य च राष्ट्रस्य विधिम् अपि रक्षति ।

**अजयः** (ईषद्दूरे शाकटिकं दर्शयित्वा) स मार्गे द्वौ वृषभौ अनुगम्य किं करोति, मातुल ?

**मातुलः** सः शनैः शनैः शकटिकां चालयित्वा इह आगच्छन् अस्ति । स कृषकः अस्ति । स शकटिकया अन्नजातं वहति । स क्षेत्राद् तद् अत्र आनयति । वयं तत् क्रीत्वा खादामः । कृषकः अपि स्वस्थानाद् राष्ट्रसेवां कुरुते ।

**अजयः** (आपणे शुल्कं सङ्कलयतः जनान् दृष्ट्वा) मातुल, एते व्यापारिभ्यः किमर्थं वित्तं गृह्णन्ति ? शुल्कग्रहणपत्रं च तेभ्यः ददति । इयम् अपि राष्ट्रसेवा भवति ?

**मातुलः** इमे राज्यस्य करग्राहकाः कर्मकराः सन्ति । सर्वकारस्य अधिकारिणाम् आदेशेन एते व्यापारिभ्यः नियमानुसारेण करं गृह्णन्ति । करग्रहणस्य प्रमाणपत्रं च ददति । करस्य वित्तं राज्यस्य कोषे सङ्कलयन्ति । तेन राज्यकोषः सबलः जायते । वयं धनिकाः सुखिनश्च भवामः ।

**अजयः** एतेषां कार्यम् अपि राष्ट्रसेवां जानानि, मातुल ?

**मातुलः** जानीहि, भागिनेय । जनतायाः राष्ट्रस्य च हितसाधकं यत् किमपि कार्यं तत् सर्वमपि राष्ट्रसेवा पदेनाभिधीयते ।

**अजयः** अहं सुष्ठु अधीत्य अन्तरराष्ट्रियस्पर्धासु सर्वोत्कृष्टं स्थानम् अवाप्तुम् इच्छामि । यदि इत्थं स्यात् तदपि राष्ट्रस्य सेवा मन्तुं शक्यते मातुल ?

**मातुलः** अवश्यं शक्यते, भागिनेय ! बहुभिः सत्कर्मभिः राष्ट्रस्य सेवा सम्भवति । स्वल्पानि महान्ति वा यानि कर्माणि राष्ट्रहितं साधयन्ति तानि राष्ट्रसेवायै एव भवन्ति । त्वमपि आत्मानं राष्ट्रसेवकं मन्वीथाः ।

(ततःपश्चाद् भागिनेयः अध्ययनार्थं प्रकोष्ठं प्रविशति । मातुलश्च कृषिकार्यं सम्पादयितुं क्षेत्रं प्रति गच्छति ।)

### शिक्षणालोकः

देशभक्तानां महापुरुषाणां प्रसङ्गं श्रावयित्वा छात्राः तेषाम् अनुकरणार्थं प्रेरणीयाः ।

## अभ्यासः

### पाठानुशीलनम्

१. **पाठं साभिनयं पठत ।**

२. **शुद्धम् उच्चारयत**

कदल्याः, उत्थाप्य, अवकरमञ्जूषायाम्, दूषितौ, स्वच्छीकर्तुम्, वक्तव्यम्, सङ्क्रामकाः, उन्नतिपथम्, सार्वजनिकानि, राष्ट्रसेवा, यष्टिम्, शाकटिकम्, क्रीत्वा, गृह्णन्ति, शुल्कग्रहणपत्रम्, राज्यकोषः, सुष्ठु, सर्वोत्कृष्टम्, सत्कर्मभिः, मन्वीथाः ।

३. **पाठाधारेण संशोध्य लिखत**

(क) अजयः मातुलेन सह ग्रामं गच्छति ।
(ख) मार्गस्य अवकरः उत्थापयितव्यः एव भवति ।
(ग) सार्वजनिकानि कार्याणि राष्ट्रस्य उन्नत्यै भवति ।
(घ) कृषकः शकटिकया अन्नजातं न वहति ।
(ङ) करग्राहकाः करग्रहणस्य प्रमाणपत्रं न ददति ।
(च) करग्रहणेन राज्यकोषः सबलः जायते ।
(छ) भागिनेयः सर्वोत्कृष्टं स्थानम् अवाप्तुम् इच्छति ।

४. **पाठस्य सन्देशं वदत ।**

५. **पदावली: परस्परं मेलयत**

| **'अ' समूहः** | **'आ' समूहः** |
|---|---|
| जनाः स्वस्वकार्येषु | सर्वैः कर्तव्यम् । |
| मातुलः कदल्याः वल्कलम् | शक्यते । |
| हस्तौ स्वच्छीकर्तुम् | अवकरमञ्जूषायां निक्षिपति । |
| अवकरस्य व्यवस्थापनम् | संलग्नाः वर्तन्ते । |
| सर्वैः राष्ट्रसेवा | दधानः आसीत् । |
| स हस्ते यष्टिम् | राष्ट्रसेवा भवति । |
| वयम् अन्नादिकम् | कर्तव्या । |
| राष्ट्रस्य हितसाधकं कार्यम् | क्रीत्वा खादामः । |

६. **मञ्जूषायाः पदानि प्रयुज्य रिक्तस्थानं पूरयत**

**(अध्ययनम्, सभ्यनागरिकस्य, सन्ति, कृषकः, अध्ययनार्थम्, कर्तव्यम्)**

(क) अवकरस्य व्यवस्थापनम् ................ परिचयः मन्यते ।

(ख) राष्ट्रसेवां विना अस्माकम् ................ एव व्यर्थम् ।

(ग) .................. अपि स्वस्थानाद् राष्ट्रसेवां कुरुते ।

(घ) इमे राज्यस्य करग्राहकाः कर्मकराः ................ ।

(ङ) करप्रदानं नागरिकस्य ............ अस्ति ।

(च) भागिनेयः ............. प्रकोष्ठं प्रविशति ।

७. **पदानि प्रयुज्य वाक्यानि रचयत**

आपणम्, संलग्नाः, निक्षिपति, मातुलः, स्वच्छीकरणम्, परिचयः, स्वच्छम्, राष्ट्रसेवा, अन्यथा, व्यर्थम्, नियुक्तः, स्वस्थानाद्, वित्तम्, कृषकः, सर्वोत्कृष्टम्, सम्भवति, क्षेत्रम् ।

८. **सङ्क्षेपेण उत्तरयत**

(क) आपणे जनाः किं कुर्वन्तः वर्तन्ते ?

(ख) अवकरस्य उत्थापनेने हस्तौ कीदृशौ भवतः ?

(ग) अवकरस्य व्यवस्थापनस्य लाभाः के ?

(घ) कीदृशानि कार्याणि राष्ट्रस्य उन्नत्यै भवन्ति ?

(ङ) कीदृशी विद्या व्यर्था ?

(च) मातुलः रक्षिणः विषये किं वदति ?

(छ) कृषकः किं किं करोति ?

(ज) करग्राहकाणां कार्यं किम् ?

(झ) वयं कथं धनिकाः भवामः ?

(ञ) भागिनेयः कथं राष्ट्रं सेवितुम् इच्छति ?

९. **विपरीतार्थकपदं मञ्जूषातः निश्चित्य लिखत**

**(सुकरम्, असंलग्नाः, ग्राहकः, कुरुपम्, असभ्यः, हानिः, दुर्बलः, नयति, अहितम्, दुःखी)**

(क) संलग्नाः = ................

(ख) दुष्करम् = ................

(ग) सभ्यः = ................

(घ) लाभः = ................

(ङ) सुन्दरम् = ................

(च व्यापारी = ................

(छ) आनयति = ................

(ज) सबलः = ................

(झ) सुखी = ................

(ञ) हितम् = ................

१०. **संवादं पठित्वा प्रश्नान् उत्तरयत**

**(विद्यालयस्य चत्वरे क्रीडनसमये छात्राणां कलहः जायते । तदा गुरुः आगच्छति ।)**

**गुरुः** किमर्थं कलहं कुरुथ छात्राः ?

**जगन्नाथः** एते नियमम् उल्लङ्घ्य क्रीडन्तः आसन् । अत एव कलहः जातः ।

**गुरुः** जगन्नाथः यद् अकथयत् तत् सत्यं किम् ?

**प्रमेयः** तथा नास्ति गुरो ! तत्र क्रीडनकाले अज्ञानेन त्रुटिः जाता । अहं क्षमां च अयाचं परन्तु एते न शृण्वन्ति ।

**गुरुः** क्रीडनकाले कदाचिद् अज्ञानेन त्रुटिः भवितुं शक्नोति । तदा क्षमा याचनीया । यदि कश्चित् क्षमां याचति चेद् कलहः न करणीयः । जगन्नाथ ! केभ्यश्चिद् दिवसेभ्यः पूर्वं तव अपि त्रुटिः जाता आसीत् । स्मरसि किम् ?

**जगन्नाथः** आम् गुरो !

**गुरुः** तदा अपि सखायः तुभ्यं क्षमां दत्तवन्तः। कलहः कदापि न कर्तव्यः। कलहेन एकता विनश्यति। सखायः न भवन्ति। सहयोगः न प्राप्यते। कलहः सर्वथा हानये भवति न तु लाभाय। अतः कलहं त्यक्त्वा अधुना मिलित्वा एव क्रीडत।

**छात्राः** भवति गुरो, वयं मिलित्वा सहैव क्रीडामः।

(गुरुः कार्यालयं गच्छति, छात्राः क्रीडनं प्रारभन्ते।)

(अ) **एकपदेन उत्तरयत**

(क) कदा कलहः जायते ?

(ख) केन त्रुटिः भवितुं शक्नोति ?

(आ) **एकवाक्येन उत्तरयत**

(क) गुरुः आगत्य किं पृच्छति ?

(ख) जगन्नाथः कलहस्य कारणं किं कथयति ?

(ग) कः क्षमाम् अयाचत् ?

(घ) के जगन्नाथाय क्षमां दत्तवन्तः ?

(इ) **शिक्षकसाहाय्येन परस्परं मेलयत**

| **'अ' समूहः** | **'आ' समूहः** |
|---|---|
| एते नियमम् उल्लङ्घ्य | अज्ञानेन त्रुटिः जाता। |
| तत्र क्रीडनकाले | चेद् कलहः न करणीयः। |
| यदि कश्चित् क्षमां याचति | क्रीडन्तः आसन्। |
| सखायः तुभ्यम् | सहैव क्रीडामः। |
| कलहः कदापि | क्षमां दत्तवन्तः। |
| वयं मिलित्वा | न कर्तव्यः। |

११. **दशमप्रश्नस्य संवादम् आधृत्य कलहे हानिर्भवतीत्यस्मिन्विषये अनुच्छेदं रचयित्वा कक्षायां श्रावयत।**

१२. **राष्ट्रसेवायै युष्माकं कीदृशी योजना वर्तते ? लिखत ।**

## व्यवहारानुशीलनम्

१. शिक्षकस्य सहयोगेन समूहं निर्माय देशप्रेम इति विषये संवादं रचयित्वा कक्षायां साभिनयं प्रदर्शयत ।

२. वातावरणस्य स्वच्छीकरणाय किं करिष्यथ ? सूचीनिर्माणं कुरुत ।

३. अस्य पाठस्य पठनानन्तरं व्यवहारं कथं परिवर्तयथ, वदत ।